# कपोत-मूषक कथा

## चतुर्थो भागः

**अत एव सर्वथाऽविचारितं कर्म न कर्तव्यमिति। यत :-**

**व्याख्या-** अतः=अस्मात् कारणात्, एव=निश्चयेन, सर्वथा=सर्वतोभावेन, अविचारितम्=अविचिन्तितम्, कर्म=कार्यम्, न कर्तव्यम्=नैव करणीयम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः-** अविचारितम्=न विचारितमिति।

**सन्धि-विच्छेदः-** अत एव=अतः+एव। सर्वथाऽविचारितम् सर्वथा+ अविचारितम्।

**प्रकृति प्रत्ययः-** सर्वथा=सर्व+थाल् (था)। अविचारितम् न+वि+चर्+ णिच् (इ)+क्त (त)। कर्तव्यम्=कृ+ तव्यत् (तव्य)।

**सुजीर्णमन्नं सुविचक्षणः सुतः,**
**सुशासिता स्त्री नृपतिः सुसेवितः।**
**सुचिन्त्य चोक्तं सुविचार्य यत्कृतं,**
**सुदीर्घकालेऽपि न याति विक्रियाम्॥** 22 **॥**

**प्रसङ्ग :-** इह लोके सदैव अखिलं कार्यं सम्यग् विचार्य एव कर्तव्यम्, न तु सहसेति।

**अन्वयः-** सुजीर्णम् अन्नम्, सुविचक्षणः सुतः, सुशासिता स्त्री, सुसेवितः नृपतिः यत् सुचिन्त्य च उक्तम्, सुविचार्य यत्कृतम्, तत् सुदीर्घकालेऽपि विक्रियां न याति।

**व्याख्या-** सुजीर्णम्=सुपक्वम्, अन्नम्=खाद्यान्नम्, सुविचक्षणः=सुशिक्षितः, सुतः=पुत्रः, सुशासिता=सुशिक्षिता, स्त्री=पत्नी, सुसेवितः=सुष्ठु आराधितः, नृपतिः =भूपतिः (यत्), सुचिन्त्य=पूर्वापरं सम्यक् विचार्य, उक्तम्=कथितम्, (यत्) सुविचार्य =पूर्वापरं विचिन्त्य, यत्कृतम्=यदनुष्ठितम्, (तत्) सुदीर्घकालेऽपि=बहुकाले व्यतीतेऽपि, विक्रियाम्=विकारभावम्, न याति=नैव प्राप्नोति।

**सरलार्थः-** सुपक्वं भोजनम्, शिक्षितः पुत्रः वशवर्तिनी भार्या, सम्यग् आराधितो नृपः, सम्यग् विचार्य उच्चारितं वचनम्, पूर्वापरं सुष्ठु विचार्य कृतं कार्यम्, एतानि षट् चिरकालपर्यन्तं विकारभावं न प्राप्नुवन्ति।

**व्याकरणम्-**

**समासः-** सुजीर्णम्=सुष्ठु जीर्णम्। सुशासिता=सुष्ठु शासिता। नृपतिः=नृणां पतिः। सुचिन्त्य=सम्यग् विचिन्त्य इति। सुदीर्घकाले=सुदीर्घश्चासौ कालः सुदीर्घकालः, तस्मिन्।

**सन्धि-विच्छेदः**-सुजीर्णमन्नम्=सुजीर्णम्+अन्नम्। चोक्तम् = च + उक्तम्। सुदीर्घकालेऽपि=सुदीर्घकाले+ अपि।

**प्रकृति प्रत्ययः**-सुजीर्णम्=सु+जॄ+क्त (त)। सुविचक्षणः सु+वि+चक्ष्+ ल्युट् (यु=अन)। सुसेवितः= सु+सेव्+क्त (त)। सुचिन्त्य=सु+चिन्त्+यत्। उक्तम्= वच्+क्त (त)। कृतम्=कृ+क्त (त)।

**छन्द** :- अत्र वंशस्थ नामवृत्तं वर्तते।

**एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह - आः किमेवमुच्यते -?**

**व्याख्याः**-एतद्वचनम्=एतस्य कपोतराजस्य कथनम्, श्रुत्वा=आकर्ण्य, कश्चित्=कोऽपि, कपोतः= पारावतः, सदर्पम्=अभिमानपूर्वकम्, आह=अवदत्, आः =अनादरे, किम्=कथम्, एवम्=एवंविधम्, उच्यते=कथ्यते।

**व्याकरणम् -**

**समासः**-सदर्पम्=दर्पेण सहितम्।

**सन्धि-विच्छेदः**-एतद् वचनम्=एतत्+वचनम्। किमेवमुच्यते=किम्+एवम् +उच्यते।

**प्रकृति प्रत्ययः**-वचनम्=वच्+ल्युट् (यु=अन)। श्रुत्वा- श्रु+क्त्वा (त्वा)।

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैवं विचारे च भोजनेऽप्यप्रवर्तनम्॥23॥**

**प्रसङ्ग** :-भोजनादिसामान्यविषये वृद्धानां वचनमग्राह्यं भवतीति।

**अन्वयः**-हि आपत् काले उपस्थिते वृद्धानां वचनं ग्राह्यम्। सर्वत्र एवं विचारे तु भोजने अपि अप्रवर्तनम् (स्यात्)।

**व्याख्या** - हि=निश्चयेन, आपत्काले=विपत्तिसमये, उपस्थिते=समागते, वृद्धानाम्=अवस्थातीतानाम्, वचनम्=कथनम्, ग्राह्यम्=स्वीकार्यम्, सर्वत्र=सर्वस्मिन् स्थाने, एवम्=इत्थम्, विचारे तु=विचारे कृतें सति, भोजनेऽपि= आहारेऽपि, अप्रवर्तनम् =अप्रवृत्तिः (स्यात्=भवेत्)।

**सरलार्थः**-आपत्काले समागते सति वयोवृद्धानां वचनं ग्राह्यम्। सर्वत्र तेषां वचनं समादरेत् चेत् भोजनेऽपि प्रवृत्ति र्न स्यादिति।

**व्याकरणम् -**

**समासः**-आपत्काले=आ (समन्तात्) पद्यते इति आपत्, आपदः कालः आपत्कालः, तस्मिन्।

**सन्धि-विच्छेदः**-ह्युपस्थिते=हि+उपस्थिते। सर्वत्रैवम्=सर्वत्र+ एवम्।

**प्रकृति प्रत्ययः**-वचनम्=वच्+ल्युट् (यु+अन)। ग्राह्यम्=गृह्+ ण्यत् (य)। उपस्थिते=उप+स्था+क्त (त)+ङि (इ)। सर्वत्र=सर्व+त्रल् (त्र)। अप्रवर्तनम्= न+प्र+वृत्+ल्युट (यु=अन)।

छन्द :-अत्र अनुष्टुप् नामवृत्तं वर्तते।

यतः- **शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले।**
**प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा॥24॥**

**प्रसङ्गः**-इह जगति प्रतिपदे संशयो विद्यते, प्रवृत्तिः कुत्र भवेदिति वर्णितम्।

**अन्वयः**-भूतले अन्नं पानं च सर्वं शङ्काभिः आक्रान्तम्, कुत्र प्रवृत्तिः कर्तव्या, कथं नु वा जीवितव्यम्।

**व्याख्या**- भूतले=धरायाम्, अन्नम्=खाद्यम्, पानःा=पानीयं च, सर्वम्= अखिलवस्तु, शङ्काभिः= आशङ्काभिः, आक्रान्तम्=व्याप्तं वर्तते, कुत्र=कस्मिन् विषये, प्रवृत्तिः=प्रवर्तनम्, कर्तव्या=करणीयम्, कथं=केन प्रकारेण, नु=इति प्रश्ने, वा= अथवा, जीवितव्यम्=जीवेत्।

**सरलार्थ** :-अस्मिन् भूतले भोजनं, जलम् अन्यानि सर्वाणि वस्तूनि सन्देहपूर्णानि सन्ति, अतः कुत्र प्रवृतिः स्यात्, तथा केन प्रकारेण प्राणान् धारयेत्।

**व्याकरणम् -**

**समासः-**भूतले=भुवः तलं भूतलम्, तस्मिन्।

**सन्धि-विच्छेदः-**सर्वमाक्रान्तमन्नम्=सर्वम्+आक्रान्तम्+अन्नम्। पानःा= पानम्+च।

**प्रकृति प्रत्ययः-**आक्रान्तम्=आ+कृम्+क्त (त)। पानम्=पा+ल्युट् (यु= अन)। प्रवृत्तिः=प्र+वृत्+क्तिन् (ति)। कुत्र=किम्+त्रल्(त्र)। कर्तव्या=कृ+ तव्यत् (तव्य)+टाप् (आ)। जीवितव्यम्=जीव्+तव्यत् (तव्य)।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

तथा चोक्तम् - **ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनोनित्यशङ्कितः।**

**परभाग्योपजीवी च षडेते दुःख-भागिनः॥ 25॥**

**प्रसङ्गः-**अत्र दुःखप्राप्तेः षट्कारणानि परिगणितानि।

**अन्वयः-**ईर्ष्यी, घृणी तु असन्तुष्टः क्रोधनः नित्यशङ्कितः परभाग्योपजीवी च एते षट् दुःखभागिनः (भवन्ति)।

**व्याख्या-** ईर्ष्यी=परोन्नत्यसहिष्णुः, घृणी=घृणाशीलः असन्तुष्टः= सन्तोषरहितः, क्रोधनः=कोपनशीलः, नित्यशङ्कितः=सततं शङ्कायुक्तः, परभाग्योपजीवी च=अन्याधीनजीवनश्च, एते=इमे, षट्=षट् संख्याकाः जनाः, दुःखभागिनः= दुःखं लभन्ते।

**सरलार्थ :-**अस्मिन् लोके ईर्ष्यी, घृणी, सदा असन्तुष्टः, कोपनशीलः सर्वदाशङ्कायुक्तः परभाग्योपजीवी च इमे षट्प्रकारकाः जनाः सदा दुःखिनो भवन्ति।

**व्याकरणम् -**

**समासः-**ईर्ष्यी=ईर्ष्या विद्यते अस्य इति। घृणी=घृणा विद्यते अस्य इति। परभाग्योपजीवी=परस्य भाग्यं परभाग्यम्, परभाग्येन जीवतीति। दुःखभागिनः=दुःखं भजन्तीति।

**सन्धि-विच्छेदः-**त्वसन्तुष्टः=तु+असन्तुष्टः। परभाग्योपजीवी= परभाग्य+ उपजीवी। षडेते=षट्+एते।

**प्रकृति प्रत्ययः-**असन्तुष्टः=न+सम्+तुष्+क्त (त)। क्रोधनः=क्रुध्+ ल्युट् (यु=अन)। शङ्कितः=शङ्क+क्त (त)। उपजीवी=उप+जीव्+णिनि (इन्)। भागिनः= भज्+घिनुण्=(इन्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतच्छ्रुत्वा तण्डुलकणलोभेन नभोमण्डलादवतीर्य सर्वे कपोताः तत्रोपविष्टाः। यत :-**

**व्याख्या-** एतत्=पूर्वोक्तं वचनम्, श्रुत्वा=आकर्ण्य, तण्डुलकणलोभेन= तण्डुलकणलिप्सया, नभोमण्डलाद्= आकाशात्, अवतीर्य=अधः आगत्य, सर्वे= समस्ताः, कपोताः=पारावताः तत्र=तण्डुलपूर्णे स्थाने, उपविष्टाः=अतिष्ठन्। यतः यतोहि -

**व्याकरणम् -**

**समासः-**तण्डुलकणलोभेन=तण्डुलानां कणाः तण्डुलकणाः, तेषां लोभः तण्डुलकणलोभः, तेन। नभोमण्डलात्=नभसः मण्डलं नभोमण्डलम्, तस्मात्।

**सन्धि-विच्छेदः-**एतच्छ्रुत्वा=एतत्+श्रुत्वा। कपोतास्तत्रोपविष्टाः=कपोताः+ तत्र+उपविष्टाः।

**प्रकृति प्रत्ययः-**श्रुत्वा=श्रु+क्त्वा (त्वा)। अवतीर्य=अव+तॄ+ल्यप् (य)। उपविष्टाः=उप+विश्+क्त (त)+ जस्(अस्)।

**सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः।**

**छेत्तारः संशयानाःा क्लिश्यन्ते लोभमोहिताः॥26॥**

**प्रसङ्ग :-**इह लोके न केवलमज्ञाः अपितु विज्ञा अपि लोभवशात् सीदन्ति।

**अन्वयः-**सुमहान्ति शास्त्राणि धारयन्तः बहुश्रुताः अपि संशयानां छेत्तारः च लोभमोहिताः (सन्तः) क्लिश्यन्ते।

**व्याख्या**-सुमहान्ति=विशालानि, शास्त्राणि=वेदोपनिषदादिग्रन्थान्, धारयन्तः =अधीतवन्तः, बहुश्रुता अपि=प्रचुरज्ञानसम्पन्ना अपि, संशयानाम्= सन्देहानाम्, छेत्तारः=भेत्तारः(विद्वांसः) लोभमोहिताः=लोभपराधीनाः, क्लिश्यन्ते= दुःखमनुभवन्ति।

**सरलार्थः**-इह जगति शास्त्राणामध्येतारः, श्रोतारः, अन्येषां संशयानां भेत्तारो विद्वांसोऽपि लोभवशाद् दुःखिनो भवन्ति।

**व्याकरणम् -**

**समासः** बहुश्रुताः=बहूनि श्रुतानि येषां ते। लोभमोहिताः=लोभेन मोहिताः।

**सन्धि-विच्छेदः**-सुमहान्त्यपि=सुमहान्ति+अपि। संशयानाा=संशयानाम् +च।

**प्रकृति प्रत्ययः**-धारयन्तः=धारि+शतृ (अत्)+जस् (अस्)। श्रुताः=श्रु+ क्त(त)+जस्(अस्)। छेत्तारः= छिद्+तृच् (तृ)+जस् (अस्)। मोहिताः=मुह्+क्त(त) +जस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते।**
**लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥27॥**

**प्रसङ्गः**-लोभ एव सर्वेषां पापानां कारणमस्ति।

**अन्वयः**-लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते, लोभात् मोहः च नाशः च (जायते) लोभः पापस्य कारणं (भवति)।

**व्याख्या** - अन्यच्च=अपरः। लोभात्=प्रलोभतः, क्रोधः=कोपः, प्रभवति= उत्पन्नो भवति, लोभात्= प्रलोभनात्, कामः=विषयोपभोगेच्छा, प्रजायते=उत्पद्यते, लोभात्=प्रलोभनतः, मोहश्च=चित्तविभ्रमश्च, नाशश्च= मृत्युश्च, (जायते=सम्पद्यते), लोभः=ईहा, (गृधः) पापस्य=सर्वदोषस्य, अघस्य वा, कारणं=हेतुः (भवति=जायते)।

**सरलार्थः**-लोभात् क्रोधः, लोभतो विषयेच्छा, लोभात् मोहो नाशश्च जायते। अत एव ज्ञायते यत् लोभ एव सर्वविधपापानां हेतुरस्ति।

**व्याकरणम् -**

**समासः**-प्रजायते=प्रकर्षेण जायते इति। प्रभवति=प्रकर्षेण भवतीति।

**सन्धिविच्छेदः**- अन्यच्च=अन्यत्+च। लोभान्मोहश्च=लोभात्+मोहः+ च। लोभात्=लुभ्+ घञ् (अ) +ङसि (आत्)। क्रोधः=क्रुध्+घञ् (अ)। कामः= कम्+घञ् (अ)। प्रजायते=प्र+जन्+श्यन् (य)+ त। कारणम्= कृ+णिच्+ (इ) +ल्युट् (यु=अन)।

**छन्द** :-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **असम्भवं हेममृगस्य देहं,**
**तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले,**
**धियोऽपि पुंसां मलिना भवन्ति॥28॥**

**प्रसङ्ग** :-विपत्तिकाले समागते सति महताम् अपि बुद्धयो दूषिता भवन्ति।

**अन्वयः**-हेममृगस्य जन्म असम्भवं (वर्तते) तथापि रामः मृगाय लुलुभे। समापन्नविपत्तिकाले पुंसां धियः अपि प्रायः मलिनाः भवन्ति।

**व्याख्या** - अन्यच्च=अपि च, हेममृगस्य=सुवर्णहरिणस्य, जन्म=उत्पत्तिः, असम्भवम्=सम्भावनारहितमस्ति, तथापि=एतादृशे ज्ञाने प्राप्तेऽपि, रामः=दाशरथिः (दशरथपुत्रः) मृगाय=कनकहरिणाय, लुलुभे=लोभमकरोत्,

समापन्नविपत्तिकाले= समुपस्थितविपत् समये, पुंसाम्=पुरुषाणाम्, धियोऽपि=बुद्धय अपि, प्रायः= अधिकांशतः, मलिनाः=मलेनाच्छादिताः भवन्ति=जायन्ते।

**सरलार्थः-** कनकमृगस्योत्पत्तिर्यद्यपि असम्भवमेव, तथापि दाशरथिरामो मृगोपरि आसक्तो बभूव। प्रायो लोके एवं दृश्यते यद् यदा विपत्तिकाल आयाति चेत् तदा पुंसां धियो नूनमेव कुण्ठिताः भवन्ति।

**व्याकरणम् -**

**समासः-**हेममृगस्य=हेम्नः मृगः हेममृगः, तस्य। रामः=रमन्ते योगिनो यस्मिन् सः। समापन्विपत्तिकाले= समापन्नाश्च ताः विपत्तयः समापन्नविपत्तयः, तासां कालः, तस्मिन्।

**सन्धि-विच्छेदः-**तथापि=तथा+अपि। रामो लुलुभे=रामः+लुलुभे। धियोऽपि=धियः+ अपि। मलिना भवन्ति=मलिनाः+ भवन्ति।

**प्रकृति प्रत्ययः-**असम्भवम्=न+सम्+भू+अप्(अ)। समापन्नः=सम्+आ+ पत्+क्त(त)। विपत्तिः= वि+पद्+क्तिन् (ति)। मलिनाः=मल्+इनन् (इन) टाप् (आ)+ जस् (अस्)।

**छन्दः-**अत्र उपजाति नामवृत्तं वर्तते।

**अनन्तरं ते सर्वे जालनिबद्धा बभुवुः, ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म। यत :-**

**व्याख्या -** अनन्तरम्=तण्डुलकणस्थाने उपवेशनानन्तरम्, ते सर्वे=अखिलाः कपोताः, जालेन=पाशेन, बद्धाः=नियन्त्रिताः बभूवुः=अभूवन्, ततः=तस्मिन् स्थाने, अवलम्बिताः=उपविष्टाः, तं=पारावतम्, सर्वे=समस्ताः, तिरस्कुर्वन्तिस्म= अधिक्षिपन्ति स्म। यतः=यतोहि -

**व्याकरणम् -**

**समासः-**अनन्तरम्=नास्ति अन्तरं (व्यवधानम्) अस्य तत्। जालनिबद्धाः= जालेन निबद्धाः।

**सन्धि-विच्छेदः-**ततो यस्य=ततः+यस्य। तत्रावलम्बितास्तम्=तत्र+ अवलम्बिताः+तम्।

**प्रकृति प्रत्ययः-**निबद्धाः=नि+बन्ध्+क्त (त)+जस् (अस्)। तत्र=तत् + त्रल्(त्र)। अवलम्बिताः= अव+लम्ब्+क्त (त)+ जस्(अस्)।

**न गणस्यागृतो गच्छेत् सिद्धे कार्ये समं फलम्।**
**यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते॥** 29॥

**प्रसङ्ग :-**कस्मिन्नपि कार्ये समुदायस्यागृणीः मा भवितव्यः।

**अन्वयः-**गणस्य अगृतः न गच्छेत्, कार्ये सिद्धे फलं समं (भवति) यदि कार्यविपत्तिः स्यात् तत्र मुखरः हन्यते।

**व्याख्या-** गणस्य=समूहस्य, अगृतः=अगृगामी भूत्वा, न गच्छेत्=नैव यायात्, कार्ये=कर्मणि, सिद्धे=सफले, फलं=परिणामः समं=तुल्यम् (भवति=जायते) यदि=चेत्, कार्यविपत्ति :=कार्यस्य अनिष्पत्तिः स्यात्=भवेत्, तत्र=तस्मिन् विषये, मुखरः=अगृगामी=हन्यते=तिरस्क्रियते।

**सरलार्थ :-**कस्यापि समूहस्यागृे कदापि न गच्छेत्, यतोहि कार्ये सिद्धे सति फलं समं प्राप्नोति, परं यदा कार्यं न सिध्यति तदा यो नेता भवति स अन्यैः सर्वैः तिरस्क्रियते।

**व्याकरणम् -**

**समासः-**कार्यविपत्तिः कार्यस्य विपत्तिः। मुखरः=मुखंवाग् अस्ति अस्य इति।

**सन्धिविच्छेदः-**गणस्यागृतो गच्छेत्=गणस्य +अगृतः+गच्छेत्। स्यान्मुखरस्तत्र=स्यात्+मुखरः+तत्र।

**प्रकृति प्रत्ययः-**अगृतः=अङ्ग+रन् (नकारलोपः)+तसिल् (तस्)। सिद्धे= सिध्+क्त (त)+ङि (इ)। कार्ये=कृ+ण्यत् (य)+ ङि (इ)। विपत्ति :=वि+पत्+क्तिन् (ति)। मुखरः=मुख+रा+क(अ)।

**छन्द :-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - नायमस्य दोषः।**

**व्याख्या -** तस्य=प्रवर्तकस्य कपोतस्य, तिरस्कारम्=अपमानम्, श्रुत्वा= आकर्ण्य, चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, अयम्=एषः, अस्य=कपोतस्य, दोषः=अपराधः, न=नास्ति।

**समासः-**तिरस्कारम्=तिरस्करोतीति तिरस्कारः, तम्।

**सन्धि-विच्छेदः-**चित्रग्रीव उवाच=चित्रग्रीवः+उवाच। नायमस्य=न+ अयम्+अस्य।

**प्रकृति प्रत्ययः-**तिरस्कारः=तृ+असुन् (अस्) कृ+अण् (अ)। श्रुत्वा=श्रु +क्त्वा (त्वा)।

यत :- **आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।**

**मातृजङ्घा हि वत्सस्य स्तम्भी भवति बन्धने॥**30 **॥**

**प्रसङ्ग :-**हितकारकोऽपि जनः अवश्यं भाविन्यां विपत्तौ कारणभूतो भवति।

**अन्वयः-**हितः अपि आपतन्तीनाम् आपदां हेतुताम् आयाति हि मातृजङ्घा वत्सस्य बन्धने स्तम्भी भवति।

**व्याख्या -** यतः=यतोहि, हितोऽपि=प्रियकारकोऽपि, आपतन्तीनाम्= आगच्छन्तीनाम्, आपदाम्=विपदाम्, हेतुताम्=कारणताम्, आयाति=प्राप्नोति, हि= यतः, मातृजङ्घा=परमहितकारी मातुः ऊरुः, वत्सस्य=धेनुसुतस्य, बन्धने=संयमने, स्तम्भीभवति=स्तम्भ इव आचरतीति।

**सरलार्थ :-**सदा प्रियकारकोऽपि सुहृद् आगच्छन्तीनां विपत्तीनां बन्धने स्तम्भस्य कार्यं करोति।

**व्याकरणम् -**

**समासः-**मातृजङ्घा=मातुः जङ्घा। स्तम्भी भवति=न स्तम्भः अस्तम्भः, अस्तम्भः स्तम्भो यथा सम्पद्यमानस्तथा भवतीति।

**सन्धि-विच्छेदः-**आपदामापतन्तीनाम्=आपदाम् +आपतन्तीनाम्। हितोऽप्यायाति=हितः +अपि+ आयाति।

**प्रकृति प्रत्ययः-** आपदाम्=आ+पद्+क्विप्+आम्। हितः=धा (हि)+क्त (त)। हेतुताम्=हेतु+तल्(त)टाप्(आ) +अम्। बन्धने=बन्ध्+ल्युट्(यु=अन)+ङि (इ)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः।**

**न तु भीतपरित्राणवस्तूपालम्भपण्डितः॥**31 **॥**

**प्रसङ्गः-**अत्र को बन्धुः कश्चाबन्धुर्भवतीति प्रतिपादितम्।

**अन्वयः-**यः विपन्नानाम् आपदुद्धरणक्षमः स बन्धुः अस्ति (यः) तु भीत-परित्राणवस्तूपालम्भपण्डितः (स बन्धुः) न (अस्ति)।

**व्याख्या-** अन्यच्च=अपरःा, यः=पुरुषः, विपन्नानाम्=विपद्गृस्तानाम्, आपदुद्धरणक्षमः=विपद्भ्यो मोचयितुं समर्थः, सः=तादृशो जनः, बन्धुः=मित्रम्, (अस्ति-वर्तते) (यः=पुमान्) तु=पुनः, भीतपरित्राणवस्तूपलम्भपण्डितः= भयभीतानां परित्राणवस्तुषु तिरस्कारकरणे समर्थः (स बन्धुः=तन्मित्रम्) न=नैव (अस्ति=वर्तते)।

**सरलार्थः-**यो नरो विपद्गृस्तानामुद्धरणाय समर्थो भवति स एव सद्बन्धु र्भवति। तथा यः पुरुषो भीतानां जनानां रक्षणस्थाने उपालम्भनप्रदाने निपुणो भवति स तु अबन्धु र्जायते।

**व्याकरणम् -**

**समासः-**आपदुद्धरणक्षमः=आपद्भ्यः उद्धरणम् आपदुद्धरणम्, तस्मिन् क्षमः(समर्थः)।

**सन्धिविच्छेदः-**बन्धुर्यः=बन्धुः+यः। विपन्नानामापदुद्धरणक्षमः= विपन्नानाम् +आपद्+उद्धरणक्षमः।

**प्रकृति- प्रत्ययः-**बन्धुः=बन्ध्+उ। विपन्नानाम्=वि+पत्+क्त (त)+ आम्। उद्धरणम्=उद्+हृ+ल्युट् (यु=अन)। परित्राणम्=परि+त्रै+ल्युट् (यु=अन)। पण्डितः=पण्डा+इतच् (इत)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। यतः-**

**व्याख्या-** विपत्काले = आपत्समये (दुःखावस्थायाम्) विस्मय एव = व्याकुलत्वमेव, कापुरुषस्य= कुत्सितपुरुषस्य, लक्षणम्=चिह्नम्। तत्=तस्माद्धेतोः, अत्र =अस्मिन् संकटकाले, धैर्यम्=धीरताम्, अवलम्ब्य=आश्रित्य, प्रतिकारः=उद्धारोपायः, चिन्त्यताम्=विचार्यताम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः**-विपत्काले=विपदां कालः विपत्कालः, तस्मिन्। कापुरुष-लक्षणम्=कुत्सितः पुरुषः, तस्य लक्षणम्।

**सन्धि-विच्छेदः**-तदत्र=तत्+अत्र।प्रतीकारश्चिन्त्यताम्=प्रतीकारः+चिन्त्यताम्।

**प्रकृति प्रत्ययः**-विपत्=वि+पत्+क्विप्।अत्र=इदम्+त्रल्(त्र)। अवलम्ब्य =अव+लम्ब्+ल्यप्(य)। यतः=यत्+तसिल् (तस्)।

**विपदिधैर्यमथाभ्युदये क्षमा,**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ,**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥32॥**

**प्रसङ्गः**-महापुरुषेषु स्वभावतो विद्यमानानां गुणानामत्र परिगणनं वर्तते।

**अन्वयः**-विपदिधैर्यम् अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः यशसि च अभिरुचिः, श्रुतौ व्यसनम् इदं हि महात्मनां प्रकृतिसिद्धं भवति।

**व्याख्या-** विपदिसंकटकाले, धैर्यम्=चित्तस्थैर्यम्, अथ अभ्युदये=उन्नति समये, क्षमा=सहनशीलता, सदसि= सभायाम्, वाक्पटुता=वाणीनां चातुर्यम्, युधि= सङ्ग्रामे, विक्रमः=पराक्रमः, यशसि=कीर्तौ, चाभिरुचिः=अतीवानुरागश्च, श्रुतौ= शास्त्रे व्यसनम्=आसक्तिः, इदम्=एतत् सर्वम्, हि=निश्चयेन, महात्मनाम्=महापुरुषाणाम्, प्रकृतिसिद्धं= स्वभावजम्, (भवति=जायते)।

**सरलार्थः**-विपत्तौ धैर्यम्, अभ्युदये सहनशीलता, सभायां वाक्पटुता सङ्ग्रामे पराक्रमः, यशसि अभिरुचिः, शास्त्रेषु अत्यन्तासक्तिः एते गुणा महापुरुषेषु स्वभावत एव विद्यन्ते।

**व्याकरणम् -**

**समासः**-वाक्पटुता=वाचां पटुता। महात्मनाम्=महान् चासौ आत्मा महात्मा, तेषाम्। प्रकृतिसिद्धम्=प्रकृत्या सिद्धम्।

**सन्धि-विच्छेदः-** धैर्यमथाभ्युदये = धैर्यम् + अथ+अभ्युदये। चाभिरुचि-र्व्यसनम् =च+अभिरुचिः+ व्यसनम्।

**प्रकृति प्रत्ययः**-विपदि=वि+पद्+क्विप्+ङि (इ)। धैर्यम्=धीर+ष्यञ् (य)। पटुता=पटु+तल् (त)+टाप् (आ)। अभिरुचिः=अभि+रुच्+इन् (इ)। व्यसनम् =वि+अस्+ल्युट् (यु=अन)।

**छन्दः**-अत्र वंशस्थ नामवृत्तं वर्तते।

**सम्पदि यस्य न हर्षो, विपदि विषादो रणे च भीरुत्वम्।**
**तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥33॥**

**प्रसङ्गः**-लोके गुणसम्पन्नाः पुरुषाः विरला एव भवन्ति।

**अन्वयः**-यस्य सम्पदि हर्षः न (भवति) विपदि विषादः (न भवति) रणे च भीरुत्वं (न भवति) तं भुवनत्रय तिलकं सुतं जननी विरलं जनयति।

**व्याख्या -** यस्य=यस्य महापुरुषस्य, सम्पदि-धनागमकाले, हर्षः=आनन्दः, न=नैव, (भवति=जायते)

विपदि=विपन्नायां स्थितौ, विषादः=खेदः, (न भवति=नैव जायते) तम्=तादृशगुणोपेतम्, भुवनत्रयतिलकम्=भुवनत्रयश्रेष्ठम्, सुतम्=पुत्रम्, जननी =माता, विरलम्=स्तोकं स्वल्पं वा, जनयति=उत्पादयति।

**सरलार्थ :**-धनागमकाले यो न प्रसीदति, विपत्तौ न सीदति, सङ्ग्रामे च कातरत्वं नाश्रयति, एतादृशं गुणयुक्तं त्रिभुवनरत्नं पुत्रं माता स्वल्पमेव जनयति।

**व्याकरणम् -**

**समासः**-भुवनत्रयतिलकम्=भुवनानां त्रयं भुवनत्रयम्, तस्य तिलकः भुवनत्रयतिलकः, तम्।

**सन्धि-विच्छेदः**-हर्षो विपदि=हर्षः +विपदि। विषादो रणे=विषादः+रणे।

**प्रकृति प्रत्ययः**- हर्षः = हृष्+घञ् (अ)। विषादः=वि+सद्+घञ्(अ)। भीरुत्वम्=भी+रु+त्व। विरलम्=वि+रा+कलन् (अल)।

**छन्दः**-अत्र 'आर्या' नामवृत्तं वर्तते।

अन्यच्च- **षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता॥34॥**

**प्रसङ्गः**-पुरुषाणां कृते षण्णां दोषाणां परित्यागार्थमत्र परिगणनं कृतम्।

**अन्वयः**-इह भूतिमिच्छतापुरुषेण निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं दीर्घसूत्रता (एते) षड्दोषाः हातव्याः।

**व्याख्या-** अन्यच्च=अपरः, इह=अस्मिन् जगति, भूतिमिच्छता=वैभवमभिलषता, पुरुषेण=मनुष्येण, निद्रा=शयनम्, तन्द्रा=अलसनम्, भयं=भीतिः, क्रोधः= कोपः, आलस्यं=परिश्रमाभावः, दीर्घसूत्रता=दीर्घकालीनयोजना, (एते=इमे) षड्दोषाः =षट्संख्याका अवगुणाः, हातव्याः=सर्वथा त्याज्याः।

**सरलार्थः**-इह लोके वैभवेच्छुकैर्जनैः निद्रा-तन्द्रा-भीति-क्रोध-आलस्यं दीर्घसूत्रता इमे षड्गुणाः सर्वथा परिहार्याः।

**समासः**-दीर्घसूत्रता=दीर्घं सूत्रं यस्य स दीर्घसूत्री, तस्य भावः।

**सन्धि-विच्छेदः**-अन्यच्च=अन्यत्+च। षड् दोषाः=षट्+दोषाः पुरुषेणेह= पुरुषेण+इह। क्रोध आलस्यम्=क्रोधः+आलस्यम्।

**प्रकृति प्रत्ययः**-हातव्या=हा+तव्यत्(तव्य)+टाप्(आ) भूतिम्=भू+ क्तिन् (ति)। इच्छता=इच्छ्+शतृ (अत्)+टा(आ)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इदानीमपि एवं क्रियताम्-सर्वैरेकचित्तीभूय जालमादाय उड्डीयताम्। यतः -**

**व्याख्या -** इदानीमपि- साम्प्रतमपि (समागतायां विपत्तावपि) एवम्=अनेन प्रकारेण, क्रियताम्=विधियताम्, सर्वैः-अखिलैः कपोतैः, एकचित्तीभूय= ऐक्यमाश्रित्य, जालमादाय=पाशं नीत्वा, उड्डीयताम्=विहायसा गम्यताम्।

**सन्धि-विच्छेदः**-सर्वैरेकचित्तीभूय=सर्वैः+एकचित्तीभूय। जालमादाय= जालम्+आदाय।

**प्रकृति प्रत्ययः**- आदाय=आ+दा+ल्यप् (य)।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥35॥**

**प्रसङ्गः**-निर्बलमपि वस्तु ऐक्यमधिगम्य बलवद् भवतीति।

**अन्वयः**-अल्पानामपि वस्तूनां संहतिः कार्यसाधिका (भवति) (यथा) गुणत्वमापन्नैः तृणैः मत्तदन्तिनः बध्यन्ते।

**व्याख्या**-अल्पानामपि=क्षुद्राणामपि, वस्तूनाम्=पदार्थानाम्, संहतिः= मेलनम्, कार्यसाधिका=कार्यसम्पादयित्री, (भवति=जायते), (यथा=येनप्रकारेण) गुणत्वमापन्नैः =रज्जुभावं प्राप्तैः, तृणैः=घासादिभिः, मत्तदन्तिनः=मदोन्मताः गजाः,

बध्यन्ते= नियम्यन्ते।

**सरलार्थः-**स्वल्पानामपि वस्तूनां संहतिः कार्यसाधिका भवति, येन प्रकारेण रज्जुभावमुपगतैर्तृणैर्गजराजोऽपि नियम्यते।

**व्याकरणम् -**

**समासः-**कार्यसाधिका=कार्यस्य साधिका। मत्तदन्तिनः=मत्ताश्च ते दन्तिनः।

**सन्धि-विच्छेदः-**तृणैर्गुणत्वमापन्नैः=तृणैः+गुणत्वम्+आपन्नैः।

**प्रकृति प्रत्ययः-**संहतिः=सम्+हन्+क्तिन् (ति)। साधिका=साध्+ण्वुल् (वु+अक)+टाप्(आ)। आपन्नैः= आ+पत्+क्त (त)+भिस् (ऐस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।**
**तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥36॥**

**प्रसङ्गः-**अत्र प्राणिनां संहतिः तुषतण्डुलवद् अतीव विशिष्टा भवति।

**अन्वयः-**पुंसाम् अल्पकैः अपि स्वकुलैः संहतिः श्रेयसी (भवति) (यथा) तुषेण अपि परित्यक्ताः तण्डुलाः न प्ररोहन्ति।

**व्याख्या -** पुंसाम्=पुरुषाणाम्, अल्पकैरपि=स्वल्पसंख्याकैरपि, स्वकुलैः= स्वबान्धवैः, संहतिः=मेलनम्, श्रेयसी=मङ्गलदायिनी, (भवति=जायते), (यथा= येन प्रकारेण)=तुषेणापि=धान्यत्वचाऽपि (बुसेनापि), परित्यक्यक्ताः= रहिताः, तण्डुलाः =धान्याः, न प्ररोहन्ति=अङ्कुरिता न भवन्ति।

**सरलार्थः-**आत्मनः कुलस्य स्वल्पजनानां समूहोऽपि कल्याणकरो भवति, येन प्रकारेण बुसरहितास्तण्डुलाः उद्गमयितुं समर्थाः नैव भवन्ति।

**व्याकरणम् -**

**समासः-**स्वकुलैः=स्वस्य कुलानि स्वकुलानि तैः।

**सन्धि-विच्छेदः-**स्वकुलैरल्पकैरपि=स्वकुलैः+अल्पकैः+अपि। परित्यक्ता न=परित्यक्ताः+न।

**प्रकृति प्रत्ययः-**संहतिः=सम्+हन्+क्तिन् (ति)। श्रेयसी=प्रशस्य (श्र)+ ईयसुन् (ईयस्)+ङीप् (ई)। अल्पकैः- अल्प+कन् (क)+भिस् (ऐस्)। परित्यक्ता= परि+त्यज्+क्त (त) जस् (अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्।**

**व्याख्या-**इति=इत्थम्, विचिन्त्य=विचार्य, सर्वे पक्षिणः=अखिलाः कपोताः, जालम्=पाशम्, आदाय=नीत्वा, उत्पतिताः=नभे उड्डीय चलिताः, अनन्तरम्=अथ च, स व्याधः=तल्लुब्धकः, सुदूरात्=अतिदूरदेशात्, जालापहारकान्=पाशमादायोत्पतितान्, तान्=पारावतान्, अवलोक्य=दृष्ट्वा, पश्चाद्धावन्= अनुगच्छन्, अचिन्तयत्= चिन्तयतिस्म।

**व्याकरणम् -**

**समासः-**जालापहारकान्=जालस्य अपहारकः, जालापहारकः, तान्।

**सन्धि-विच्छेदः-**जालमादाय = जालम् + आदाय। सुदूराज्जालापहारकां स्तानवलोक्य = सुदूरात् + जाल + अपहारकान् + तान्+अवलोक्य। पश्चाद्धावितोऽचिन्तयत्=पश्चात्+धावितः+अचिन्तयत्।

**प्रकृति प्रत्ययः**-विचिन्त्य=वि+चिन्त् +ल्यप् (य)। आदाय=आ+दा+ ल्यप् (य)। उत्पतिताः=उत्+पत्+क्त (त) जस् (अस्)। अपहारकान्=अप+हृ+ण्वुल् (वु=अक) शस् (अस्)। अवलोक्य=अव+लोक्+ल्यप् (य)।

**संहतास्तु हरन्त्येते मम जालं विहङ्गमाः।**
**यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा॥37॥**

**प्रसङ्गः**-अत्र जालमादाय उड्डीयमानान् कपोतान् विलोक्य व्याधश्चिन्तयति।

**अन्वयः**-एते विहङ्गमाः तु संहताः (सन्तः) मम जालं हरन्ति यदा तु-निपतिष्यन्ति तदा मे वशम् आगमिष्यन्ति।

**व्याख्या-** एते=इमे, विहङ्गमाः=पक्षिणः (कपोताः) तु संहताः=एकत्रिताः (सन्तः) मम=व्याधस्य, जालम्=शणसूत्रम्, हरन्ति=आदाय गच्छन्ति, यदा तु= यस्मिन् काले तु, निपतिष्यन्ति=भूमावागमिष्यन्ति, तदा=तस्मिन् समये, मे=मम, (लुब्धकस्य) वशम्=अधीनम्, एष्यन्ति=आगमिष्यन्ति।

**सरलार्थ :**-एते सर्वे कपोताः युगपत् सम्मिलिताः पवित्रकमादाय (जालं नीत्वा) आकाशमार्गेण गच्छन्ति, किन्तु यदा एते भूमौ निपतिष्यन्ति तदा मे वशमागमिष्यन्ति।

**व्याकरणम् -**

**समासः**-विहङ्गमाः=विहायसा (आकाशमार्गेण) गच्छन्तीति।

**सन्धि-विच्छेदः**-संहतास्तु=संहताः+तु। हरन्त्येते=हरन्ति+एते। वशमेष्यति =वशम्+एष्यति।

**प्रकृति प्रत्ययः**-संहताः=सम्+हन्+क्त (त) जस् (अस्)। विहङ्गमाः= विहायस्+गम्+खच् (अ)(मुमागमो विहादेशश्च)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**ततस्तेषु चक्षुर्विषयातिक्रान्तेषु स व्याधो निवृत्तः। अथ लुब्धकं निवृत्तं दृष्ट्वा, कपोता ऊचुः-किमिदानीं कर्तुमुचितम्? चित्रग्रीव उवाच -**

**व्याख्या**-ततः=तदनन्तरम्, तेषु=कपोतेषु, चक्षुर्विषयातिक्रान्तेषु=नेत्रदेशातीत्यगतेषु, स व्याधः=तल्लुब्धकः, निवृत्तः=प्रत्यावृत्तः। अथ= अनन्तरम्, लुब्धकम्= व्याधम्, निवृत्तम्=प्रत्यावृत्तम्, दृष्ट्वा=विलोक्य, कपोताः= पारावताः। ऊचुः=जगदुः (उक्तवन्तः) इदानीम्=साम्प्रतम्, किं कर्तुम्=किं विधातुम्, उचितम्= समीचीनम् ? चित्रग्रीवः=कपोत राजः, उवाच=जगाद।

**व्याकरणम्**

**समासः**-चक्षुर्विषयम्=चक्षुषोर्विषयः चक्षुर्विषयः, तम्।

**सन्धि-विच्छेदः**- ततस्तेषु = ततः + तेषु। चक्षुर्विषयमतिक्रान्तेषु = चक्षुः+ विषयम्+अतिक्रान्तेषु। कपोता ऊचुः=कपोताः +ऊचुः।

**प्रकृति प्रत्ययः**-अतिक्रान्तेषु=अति+क्रम्+क्त (त)। दृष्ट्वा=दृश्+क्त्वा (त्वा)। उचितम्=उच् +इट्+क्त(त)

**माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्।**
**कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः॥38॥**

**प्रसङ्ग :**-लोके स्वभावतो ये त्रयो हितकारिणो भवन्ति तेषां परिगणनमत्र वर्तते।

**अन्वयः**-माता मित्रं पिता च इति त्रितयं स्वभावात् हितम् (भवति) अन्ये च कार्यकारणतः हितबुद्धयः भवन्ति।

**व्याख्या-** माता=जननी, मित्रं=सखा (सुहृत्) पिता=जनकः, च=तथा, इति= एतत्, त्रितयं=त्रयम्, स्वभावात्=प्रकृतितः, हितम्=हितकरम्, (भवति=जायते) अन्ये च=अपरे च, कार्यकारणतः=स्वार्थवशात्, हितबुद्धयः= हितकराः, भवन्ति= जायन्ते।

**सरलार्थ :**-लोके माता पिता मित्रञ्चैतत्त्रयं स्वभावतो हितकरं भवति। अन्ये च केचन जनाः कार्यवशात् केचन

च कारणवशाद् हितकराः भवन्ति।

**व्याकरणम्**

**समासः-**त्रितयम्=त्रयोयऽवयवा यस्य इति। कार्यकारणतः=कार्यं च कारणं च ताभ्याम्। हितबुद्धयः= हिताबुद्धिर्येषां ते।

**सन्धि-विच्छेदः-** चेति = च + इति। कार्यकारणतश्चान्ये=कार्यकारणतः+ च+अन्ये।

**प्रकृति-प्रत्ययः**-पिता=पा+तृच् (तृ)। माता=मान् (पूजायां) +तृच् (तृ) (नलोपः)। हितम्=धा (हि)+क्त (त)। बुद्धयः=बुध्+क्तिन् (ति)+जस् (अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तन्मे मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशांश्छेत्स्यति इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः। हिरण्यकश्च सर्वदाऽपायशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूर्ष्णीं स्थितः। चित्रग्रीव उवाच - 'सखे हिरण्यक! किमस्मान्न सम्भाषसे?' ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञायं ससम्भ्रमं बहिर्निसृत्य अब्रूवीत्- 'आः पुण्यवानस्मि प्रियसुहन्मे चित्रग्रीवः समायातः।'**

**व्याख्या -** तत्=तस्मात् कारणात्, मे=मम (चित्रग्रीवस्य) मित्रम्=सुहृत्, हिरण्यको नाम=एतन्नामधेयः, मूषिकराजः=मूषकाणां राजा, गण्डकीतीरे=एतदाख्याया नद्यास्तटे, चित्रवने=एतदाख्येऽरण्ये, निवसति=निवासं करोति। सः= मूषिकराजः, अस्माकम्=नः (कपोतानाम्) पाशान्=बन्धनानि, छेत्स्यति=भेत्स्यति, इत्यालोच्य= इत्थं विचार्य, सर्वे:=अखिलाः कपोताः, हिरण्यकस्य= एतदाख्यस्य मूषकस्य, विवरसमीपम्=विलप्रदेशं निकषा, गताः=प्राप्ताः। हिरण्यकश्च= मूषकराजश्च, सर्वदा सततम् (निरन्तरम्) अपायशङ्कया=नाशभीत्या, शतद्वारं= शतमार्गम्, विवरं=विलम्, कृत्वा=निर्माय, निवसति=वासं करोति । ततः=तदनन्तरम्, हिरण्यकः=मूषिकराजः, कपोतावपातभयात्=पारावतानां वेगागमनभीतेः, चकितः= विह्वलः, तूर्ष्णीं=मौनम्, स्थितः=अतिष्ठत्। चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, सखे हिरण्यक! मित्रहिरण्यक! कथं=केन कारणेन, अस्मान्-नः (कपोतान्) न भाषसे=नैव ब्रूवीषि, ततः= कपोतराजस्य वचनानन्तरम्, हिरण्यकः=मूषकराजः, तद्वचनम्=चित्रग्रीवस्य वाचम्, प्रत्यभिज्ञाय=अवगम्य, ससम्भ्रमम्= अत्युत्साहपूर्वकम्, बहिः=विवराद् बहिः, निःसृत्य=निर्गत्य, अब्रूवीत्=अवदत्, आः=अरे (आश्चर्यसूचकमव्ययम्) पुण्यवानस्मि=पुण्यभाग् अस्मि, प्रियसुहृत्=प्रियमित्रम्, मे=मम, चित्रग्रीवः=कपोतराजः, समायातः=समागच्छत्।

**व्याकरणम् :-**

**समासः-**गण्डकीतीरे=गण्डकी नाम नदी तस्यास्तीरम्, तस्मिन्। चित्रवने= चित्रं च तद्वनं च तस्मिन्। हिरण्यकस्य विवरसमीपम्=हिरण्यकस्य विवरं हिरण्यकविवरम्, तस्य समीपम्। अपायशङ्कया=अपायस्य (नाशस्य) शङ्का अपायशङ्का, तया। कपोतावपातभयात्=कपोतानामवपातः कपोतावपातः, तस्माद् भयं कपोतावपातभयम्, तस्मात्। प्रियसुहृत्=प्रियश्चासौ सुहृच्चेति (प्रीणतीति प्रियः, शोभनं हृदयं यस्य सः सुहृत्)।

**सन्धि-विच्छेदः-** तन्मे=तत्+मे।सोऽस्माकम्=सः+अस्माकम्। पाशांछेत्स्यति =पाशान्+छेत्स्यति। इत्यालोच्य= इति+आलोच्य। कपोतावपातभयाच्चकितः= कपोत+अवपातभयात्+चकितः। कथमस्मान्न=कथम्+ अस्मात्+न। बहिर्निःसृत्य= बहिः+निःसृत्य।

**प्रकृति प्रत्ययः-**आलोच्य=आ+लोच्+ल्यप् (य)। गताः गम्+क्त (त)+जस् (अस्)। सर्वदा=सर्व+दाच् (दा)। कृत्वा=कृ+क्त्वा (त्वा)। चकितः= चक्+क्त (त) स्थितः=स्था +क्त (त)। प्रत्यभिज्ञाय=प्रति+अभि+ ज्ञा+ल्यप्(य)। निःसृत्य=निस्+सृज् +ल्यप् (य)। समायातः=सम्+आ+या+क्त (त)।

**यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः।**
**यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥39॥**

**प्रसङ्गः-**अत्र मित्रस्य महत्त्वं प्रतिपादितम्।

**अन्वयः**-यस्य मित्रेण (सह) सम्भाषः (भवति) यस्य मित्रेण (सह) संस्थितिः (भवति) यस्य मित्रेण (सह) संलापः (भवति) ततः इह पुण्यवान् नास्ति।

**व्याख्या**- यस्य=पुरुषस्य, मित्रेण=सुहृदा (सह=साकम्) सम्भाषः= वार्तालापः, (भवति=जायते) यस्य=नरस्य, मित्रेण=सख्या, (सह=सार्द्धम्) संस्थितिः= एकत्रनिवासः (भवति=जायते)यस्य=पुंसः, मित्रेण=सुहृदा (सह=समम्) संलापः= परस्परं विचारविमर्शः (भवति) ततः=तस्मात् पुरुषात्, इह=अस्मिन् लोके, पुण्यवान्= सौभाग्यवान्, नास्ति=अन्यः कश्चिद् न वर्तते।

**सरलार्थः**-अस्मिन् जगति स एव पुण्यवान् अस्ति यस्य मित्रेण सह वार्तालापो भवति, मित्रेण सार्द्धं निवासो भवति, तथा मित्रेण सह परस्परं विचार-विमर्शो भवति।

**समासः**-सम्भाषः=सम्यक् प्रकारेण भाषः। पुण्यवान्=पुण्यमस्ति यस्य इति।

**सन्धि-विच्छेदः**-संस्थितिः=सम्+स्थितिः। संलापस्ततः=संलापः+ततः। नास्तीह=नास्ति+इह।

**प्रकृति प्रत्ययः**-सम्भाषः=सम्+भाष्+घञ् (अ)। संस्थितिः=सम्+ स्था+क्तिन् (ति)। पुण्यवान्=पुण्य+मतुप् (मत्) मस्य वः।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच-सखे! किमेतत्? चित्रग्रीवोऽवदत् - सखे! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।**

**व्याख्या** - अथ=एतदनन्तरम्, पाशबद्धान्=जालेन संनियमितान्, च=तथा, एतान्=कपोतान्, दृष्ट्वा= अवलोक्य, सविस्मयः=आश्चर्ययुक्तः, क्षणं= किञ्चित्-कालम्, स्थित्वा=विरम्य, उवाच=अवदत्, सखे!=हे मित्र! एतत् किम्= पाशबन्धनं किं निमित्तम्। चित्रग्रीवः=कपोतराजः, अवदत्=अकथयत्, सखे!=हे सुहृत्! अस्माकं=नः (कपोतानाम्) प्राक्तनजन्मकर्मणः=पूर्वस्मिन् जन्मनिविहितासत्कृत्यस्य, एतत्= पुरोदृश्यमानम्, फलम्=परिणाम अस्तीति।

**व्याकरणम्** -

**समास** :-पाशबद्धान् =पाशेन बद्धाः पाशबद्धाः, तान्। सविस्मयः= विस्मयेन सहितः। प्राक्तनजन्मकर्मणः = प्राक्तनं च तज्जन्मप्राक्तनजन्म, तस्मिन् कृतं कर्म प्राक्तनजन्मकर्म, तस्य।

**सन्धि-विच्छेदः**-पाशबद्धांश्चैतान्=पाशबद्धान्+च+एतान्। किमेतत्=किम् +एतत्।

**प्रकृति प्रत्ययः**-दृष्ट्वा=दृश्+क्त्वा (त्वा)। सविस्मयः=सह (स)+ वि+स्मि+अच् (अ)।

**यस्माच्च येन च यथा च यदा च यच्च,**
**यावच्च यत्र च शुभाशुभमात्मकर्म।**
**तस्माच्च तेन च तथा च तदा च तच्च,**
**तावच्च तत्र च विधातृवशादुपैति॥40॥**

**प्रसङ्गः**- अवश्यम्भाविनी घटना भवत्येव, तां परिवर्तयितुं न कोऽपि समर्थः।

**अन्वयः**-यस्मात् च येन च यथा च यदा च यत् च यावत् च यत्र च शुभाशुभम् आत्मकर्म (भवति)। विधातृवशात् तस्मात् च तेन च तथा च तदा च तत् च तावत् च तत्र च उपैति।

**व्याख्या**=यस्मात् च=यद्धेतोश्च, येन च=यत्कारणेन च, यथा च=येन प्रकारेण च, यदा च=यस्मिन् काले च, यत् च=यादृशं च, यावत् च=यत्परिमाणः, यत्र च=यस्मिन् देशे च, शुभाशुभम्=पुण्यं पापं च, आत्मकर्म=स्वस्यकर्म, (भवति=जायते) विधातृवशात्=दैववशात्, तस्मात् च=तत्कारणाच्च, तेन च=तत् कारणेन च, तथा च=तेन प्रकारेण च, तदा च=तस्मिन् समये च, तत् च=तत् कर्मफलः, तावत् च=तत् परिमितः, तत्र च=तस्मिन् स्थाने च, उपैति=प्राप्नोति।

**सरलार्थः**-इह लोके यस्मात् कारणाद् येन हेतुना येन प्रकारेण यदा यादृशं यत्परिमाणं यस्मिन् काले शुभाऽशुभं

वाऽऽत्मकृतं कर्म भवति, तत्कमफलं दैववशात् तस्मात् कारणात् तेन प्रकारेण तस्मिन् समये तस्मिन् स्थाने च नूनमेव मनुष्यः प्राप्नोति।

**विशेष :-**अत्र चतुर्दश चकाराणां प्रयोगः पादपूर्तयेऽभवत्।

**व्याकरणम् -**

**समासः-**शुभाऽशुभम्=शुभःा अशुभःा । आत्मकर्म आत्मनः (स्वस्य) कर्म। विधातृवशात्=विधातुः वशः विधातृवशः, तस्मात्।

**सन्धि-विच्छेदः-**यस्माच्च=यस्मात्+च। यावच्च=यावत्+च। शुभाऽशुभमात्मकर्म=शुभ+अशुभम्+ आत्मकर्म। तच्च=तत्+च। विधातृवशादुपैति= विधातृ-वशात्+उपैति।

**प्रकृति प्रत्ययः-**यदा=यत्+दाच् (दा)। विधातृ=वि+धा+तृच् (तृ)।

**छन्दः-**अत्र वसन्ततिलका नामवृत्तं वर्तते।

**रोग-शोक-परीताप-बन्धन-व्यसनानि च॥**
**आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्॥41॥**

**प्रसंग :-** पूर्वकृतकर्मणां फलान्येवात्र पुरुषः प्राप्नोति।

**अन्वयः-**रोगशोकपरीतापबन्धनव्यसनानि एतानि च देहिनाम् आत्मापराधवृक्षाणां फलानि (सन्ति)।

**व्याख्या-** रोगः=शरीरव्याधिः, शोकः=मानसिकचिन्ता, परीतापः=अनेकविधसन्तापः, बन्धनम्=पाशादिना नियन्त्रणम्, व्यसनम्=विपत्तिश्च, एतानि=इमे रोगशोकादयः, च=तथा, देहिनाम्=मनुष्याणाम्, आत्मापराधवृक्षाणाम्= स्वस्य दुष्कर्मतरूणाम्, फलानि=परिणामाः, (सन्ति=वर्तन्ते)।

**सरलार्थः-**अस्मिन् जगति रोगशोकसन्तापबन्धनविपत्तयश्च प्राणिनां कृते स्वस्यापराधरूपवृक्षाणां फलान्येव सन्ति।

**व्याकरणम् -**

**समासः-** रोगशोकपरीतापबन्धनव्यसनानि=रोगश्च शोकश्च परीतापश्च बन्धनं च व्यसनं च इति।

ते एव वृक्षाः, आत्मापराधवृक्षाः, तेषाम्।

**सन्धि-विच्छेदः-**आत्मापराधवृक्षाणाम्=आत्मा+अपराधवृक्षाणाम्। फलान्येतानि=फलानि+एतानि।

**पृकृति-प्रत्ययः-** व्यसनानि=वि+अस्+ल्युट् (यु=अन)+जस् (शि=इ)। देहिनाम्=देह+इनि (इन्)+आम्।

**छन्दः-** अत्र अनुष्टुप् नामवृत्तं वर्तते।

**एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच- 'मित्र! मा मैवं कुरु'। प्रथममस्मदाश्रितानामेतेषां तावत् पाशांश्छिन्धि, तदा मम पाशं पश्चात् छेत्स्यसि। हिरण्यकोप्याह - अहमल्पशक्तिः दन्ताश्च मे कोमलाः, तदेतेषां पाशांश्छेत्तुं कथं समर्थो भवामि? तद् यावन्मे दन्ता न त्रुट्यन्ति तावत् तव पाशं छिनद्मि। तदनन्तरमप्येतेषां बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच 'अस्त्येवं तथापि यथाशक्त्येतेषां बन्धनं खण्डय'। हिरण्यकेनोक्तम् आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्। यतः-**

**व्याख्या-** एतत्=तद्वचनम्, श्रुत्वा=आकर्ण्य, हिरण्यकः=एतदाख्यो मूषकराजः, चित्रग्रीवस्य=कपोतराजस्य, बन्धनं=नियन्त्रणम्, छेत्तुम्=भेदनं कर्तुम्, सत्वरम्=शीघ्रम्,उपसर्पति=समीपं गच्छति। चित्रग्रीवः=कपोतराजः,उवाच= अब्रवीत्, मित्र!=सखे! मा मैवम्=एवं न कुरु, (आदौ मम पाशछेदनप्रयासं मा कुरु) प्रथमम् = आदौ, अस्मदाश्रितानाम्= ममाधीनवर्तिनाम्, एतेषाम्=एषां कपोतानाम्, तावत् =पूर्वम्, पाशान्=बन्धनानि, छिन्धि=कर्तय, तदा=तदनन्तरम्, मम=मे (चित्रग्रीवस्य) पाशम्= बन्धनम्, पश्चात्=अनन्तरम्, छेत्स्यसि=छेदनं करिष्यसि, हिरण्यकोऽपि= मूषकराजोऽपि, आह=उवाच, अहम्=हिरण्यकः, अल्पशक्तिः=स्वल्पबली, दन्ताश्च= दशनाश्च, मे=मम, कोमलाः=मृदुलाः, तत्=तस्माद्धेतोः,

एतेषाम्=कपोतानाम्, पाशान्= बन्धनानि, छेत्तुम्=भेत्तुम्, कथम्=केन प्रकारेण, समर्थो भवामि=शक्तो भवामि। तत्= तस्मात् कारणात्, यावत्=यावत्कालपर्यन्तम्, मे=मम, दन्ताः=दशनाः, न=नहि, त्रुट्यन्ति=भग्नाः भवन्ति, तावत्=तावत् कालपर्यन्तम्, तव=भवतः (चित्रग्रीवस्य) पाशम्=जालम्, छिनद्मि=खण्डशः करोमि। तदनन्तरम्=तदनु एतेषामपि=एषाम् (कपोतानाम्) अपि, बन्धनम्=पाशम्, यावच्छक्यम्=यथाशक्ति (स्वसामर्थ्यानुसारम्) छेत्स्यामि=खण्डनं करिष्यामि। चित्रग्रीवः=कपोतराजः, उवाच=अवदत्, अस्त्वेवम्= भवत्वेवम्, तथापि=इत्थंभूतेऽपि, यथाशक्ति=निजसामर्थ्यानुसारम्, एतेषाम् =एषां पारावतानाम्, बन्धनं=जालम्, खण्डय=कर्तय। हिरण्यकेन मूषकेन, उक्तम्= कथितम्, आत्मपरित्यागेन= निजरक्षणमपहाय, यद् आश्रितानाम्=सेवकानाम् (कुटुम्बसदस्यानाम्) परिरक्षणम्=सर्वतस्त्राणम्, तत्=नीतिज्ञानम् न=नहि, नीतिविदाम्= नीतिज्ञानाम्, सम्मतम्=अभिमतम्। यतः=यतोहि-

**व्याकरणम् -**

**समासः-** अस्मदाश्रितानाम् अस्मान् आश्रिताः अस्मदाश्रिताः तेषाम्। अल्पशक्तिः=अल्पा शक्तिर्यस्य सः। यथाशक्ति=शक्तिमनतिकृम्य। आत्मपरित्यागेन =आत्मनः परित्यागःतेन ।

**सन्धिविच्छेदः-** एतच्छ्रुत्वा=एतत्+श्रुत्वा। मैवम्=मा+एवम्। प्रथममस्मदाश्रितानामेतेषाम्=प्रथमम्+ अस्मत्+आश्रितानाम्+एतेषाम्। पश्चाच्छेत्स्यसि= पश्चात्+छेत्स्यसि। हिरण्यकोप्याह=हिरण्यकः+अपि+आह दन्ताश्च=दन्ताः+च। पाशांश्छेत्तुम्=पाशान्+छेत्तुम्। यावन्मे=यावत्+मे। तदनन्तरमप्येतेषाम्=तत्+अनन्तरम् अपि+ एतेषाम्। अस्त्वेवम्=अस्तु+एवम्।

**प्रकृति प्रत्ययः-**श्रुत्वा=श्रु+क्त्वा(त्वा)बन्धनम्+बन्ध्+ल्युट् (यु=अन)। छेत्तुम्=छिद्-तुमुन् (तुम्)। शक्यम्=शक्+यत् (य)। उक्तम्=वच्+क्त (त)। परित्यागेन=परि+त्यज्+घञ् (अ)+टा(इन)। परिरक्षणम्=परि+रक्ष्+ ल्युट् (यु= अन)। सम्मतम्=सम्+मन्+क्त (त)। यतः=यत्+तसिल् (तस्)।

**आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि।**
**आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥42॥**

**प्रसङ्गः-**इह जगति आत्मनो रक्षणं सर्वोपरि मन्यते।

**अन्वयः-**आपदर्थे धनं रक्षेत्, धनैः अपि दारान् रक्षेत्, आत्मानं दारैः अपि धनैः अपि सततं रक्षेत्।

**व्याख्या-**आपदर्थे=विपत्तिपरिहारार्थम्, धनं=धनसम्पत्तिम्, रक्षेत्=सङ्ग्रहणं कुर्यात्, धनैरपि=वित्तैरपि, दारान्=स्त्रियम्, रक्षेत्=रक्षणं कुर्यात् (पालयेत्) आत्मानम् = स्वकीयम्, दारैरपि धनैरपि=स्त्रीधनादिभिरपि, सततम्= निरन्तरम्, रक्षेत्=पालयेत्।

**सरलार्थः-**अस्मिन् संसारे मनुष्यः संकटकालार्थं धनसंरक्षणं कुर्यात्। धनादिभिः स्त्रीं रक्षेत्। आत्मरक्षणन्तु, धनदारादिभिरपि सततं कर्तव्यम्।

**व्याकरणम् -**

**समासः-**आपदर्थे=आपदाम् अर्थः आपदर्थः, तस्मिन्।

**सन्धिविच्छेद-** आपदर्थे=आपद्+अर्थे। धनैरपि=धनैः+अपि।

**प्रकृति प्रत्ययः-** आपद्=आ+पद्+क्विप् (सर्वापहारलोपः)। आत्मानम् =अत् मनिन्(मन्)+अम्।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।**
**तन्निघ्नता किं न हतं रक्षता किं न रक्षितम् ॥43॥**

**प्रसङ्गः-** लोके प्राणसंरक्षणं सर्वोपरि मन्यते।

**अन्वयः-**प्राणाः धर्मार्थकाममोक्षाणां संस्थिति हेतवः (भवन्ति) तान् निघ्नता किं हतं न (भवति) (तान्)

रक्षता (च) किं रक्षितं न (भवति)।

**व्याख्या -** प्राणाः=असवः (स्वजीवनम्) धर्मार्थकाममोक्षाणाम्=पुरुषार्थ- चतुष्टयस्य, संस्थितिहेतवः= संस्थितौ सम्यक् परिरक्षणे, हेतवः=कारणानि (भवन्ति= जायन्ते) तान्=असून्, निघ्नता=विनाशं कुर्वता, किं न हतम्=किं न विनाशितम्, (भवति=जायते) (तान्=प्राणान्) रक्षता च=पोषयता च (जनेन=पुरुषेण) किं रक्षितं न= किं न गोपायितम् (अखिलं पुरुषार्थपालितमित्यर्थः), (भवति=जायते)।

**सरलार्थः-**लोके प्राणाः पुरुषार्थचतुष्टयस्य हेतवो मन्यन्ते, प्राणान् विनाशयता जनेन किं न विनाशितम्, तथा असून् रक्षता पुरुषेण किं न गोपायितम् अर्थात् सर्वं तेन रक्षितम् इत्यर्थः।

**व्याकरणम् -**

**समासः-**धर्मार्थकाममोक्षाणाम्=धर्मश्च अर्थश्च कामश्च मोक्षश्चेति धर्मार्थकाममोक्षाः, तेषाम्। संस्थिति हेतवः=संस्थितेः (संरक्षणस्य) हेतवः।

**सन्धि-विच्छेदः-** अन्यच्च=अन्यत्+च। किन्न=किम्+न।

**प्रकृति प्रत्ययः-**प्राणाः=प्र+अन्+अच् घञ् वा (अ)+जस् (अस्)। संस्थितिः=सम्+स्था+क्तिन् (ति)। निघ्नता=नि+हन्+क(अ)+तृच् (तृ)। रक्षितम्= रक्ष्+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**चित्रग्रीव उवाच - सखे! नीतिस्तावत् ईदृश्येव, किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः तेनेदं ब्रवीमि।**

**व्याख्या-** चित्रग्रीवः=कपोतराजः, उवाच=अब्रवीत्, सखे!=हे मित्र!, नीतिः =नयः, तावत्=निस्सन्देहः, ईदृश्येव=इत्थंभूतैव, किन्तु=परन्तु, अहम्= कपोतराजः, अस्मदाश्रितानाम्=स्वपरिचराणाम्, दुःखं=कष्टम्, सोढुं=सहनं कर्तुम्, सर्वथा= पूर्णरूपेण, असमर्थः=अयोग्यः,(अस्मि), तेन=तेन हेतुना, इदम्=एतत्, ब्रवीमि= वच्मि।

**व्याकरणम् -**

**समासः-**अस्मदाश्रितानाम्=अस्माकमाश्रिताः अस्मदाश्रिताः, तेषाम्। असमर्थः=न समर्थः।

**सन्धि-विच्छेदः-**चित्रग्रीव उवाच=चित्रग्रीवः+उवाच। नीतिस्तावत्=नीतिः +तावत्। ईदृश्येव=ईदृशी+एव। किन्त्वहमस्मदाश्रितानाम्=किन्तु+अहम्+अस्मत्+ आश्रितानाम्।

**प्रकृति प्रत्ययः-**नीतिः=नी+क्तिन् (ति)। आश्रितानाम्=आ+श्रि+क्त (त)+आम्। सोढुम्=सह्+तुमुन् (तुम्)। सर्वथा=सर्व+थाल् (था)।

यत :- **धनानि जीवितःैव परार्थे प्राज्ञः उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति॥44॥**

**प्रसङ्गः-**श्रेष्ठ कार्यसम्पादनाय जीवनस्य वित्तस्य च त्यागः श्रेयष्करो भवति।

**अन्वयः-**प्राज्ञः परार्थे एव धनानि जीवितं च उत्सृजेत्, विनाशे नियते सति सन्निमित्ते त्यागः वरम् (अस्ति)।

**व्याख्या -** यतः=यतोहि, प्राज्ञः=बुद्धिमान् पुरुषः, परार्थे=अन्यस्य (जनस्य) कृते, एव=अवश्यमेव, धनानि=वसूनि, जीवितःा=स्वप्राणांश्च, उत्सृजेत्=त्यजेत् (यतोहि) विनाशे=वित्तजीवनस्य नाशे, नियते सति=निश्चिते सति, सन्निमित्ते=परोपकारकरणाय, त्यागः=धनजीवनयो र्विसर्जनम्, वरम्=उत्कृष्टम् (अस्तीति)।

**सरलार्थः-**अस्मिन् जगति प्राज्ञो जनः परेषां कल्याणाय स्वकीयं जीवनं धनानि च विसर्जयेत्, यतोहि धनजीवितयोर्विनाशं सुनिश्चितमस्ति तर्हि श्रेष्ठकार्य-सम्पादनार्थं धनस्य प्राणानाःा विसर्जनं वरं भवति।

**व्याकरणम् -**

**समासः-**परार्थे=परेषाम् अर्थः परार्थः, तस्मिन्। सन्निमित्ते=सत् निमित्तम् सन्निमित्तम्, तस्मिन्।

**सन्धि-विच्छेदः-**जीवितःैव=जीवितम्+च+एव ।सन्निमित्ते=सत्+निमित्ते। त्यागो विनाशे=त्यागः+विनाशे।

**प्रकृति प्रत्ययः-** जीवितम्=जीव्+क्त (त)। प्राज्ञः=प्र+ज्ञा+क (अ) ततः स्वार्थे अण्। सन्निमित्ते=सत्+नि+मित्+क्त (त)+ङि (इ)। नियते=नि+यम्+क्त (त) +ङि (इ)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अयमपरश्चासाधारणो हेतुः।**

**व्याख्या** -अयम्=एषः, अपरश्च=अन्यश्च, असाधारणः=प्रमुखः, हेतुः= निमित्तम् (वर्तते)।

**व्याकरणम् -**

**समासः**-असाधारणः=न साधारणः।

**सन्धि-विच्छेदः**-अयमपरश्चासाधारणो हेतुः=अयम्+अपरः+च+ असाधारणः+हेतुः।

**जातिद्रव्यबलानाः। साम्यमेषां मया सह।**
**मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति॥45॥**

**प्रसङ्गः**-यत्र कपोतराजः स्वसमीपस्थितानां कपोतानां रक्षणार्थं स्वकीयान् प्राणान् अपि प्रदातुं तत्परो दृश्यते।

**अन्वयः**-मया सह एषां जातिद्रव्यबलानां च साम्यम् (अस्ति) तत् मत्प्रभुत्वफलं (कदा) किं भविष्यति? (इति) ब्रूहि।

**व्याख्या**-मया=चित्रग्रीवेण, सह=साकम्, एषाम्=एतेषां कपोतानाम्,जातिद्रव्यबलानाः। = जातिः = कपोतत्वम्, द्रव्यं = शरीरावयवम्, बलम् = शक्तिः, सहवासादिगुणानां सङ्ग्रहश्च,साम्यं= तुल्यम्, (अस्ति= वर्तते),तत्=तर्हि,मत्प्रभुत्वफलम् =मम स्वामित्वस्य कर्तव्यफलम् (कदा=कस्मिन् काले) किं भविष्यति=कस्मिन् स्वरूपे भविष्यति, इति ब्रूहि=एष कथय।

**सरलार्थः**-एतेषां कपोतानां मया (कपोतराजेन) सहजातिद्रव्यगुणेषु च तुल्यता वर्तते, तदा त्वमेव कथय ममाधिपत्यस्य कर्त्तव्यफलं कस्मिन् समये कस्मिन् स्वरूपे भविष्यति।

**व्याकरणम् -**

**समासः**-जातिद्रव्यबलानाम्=जातिश्च द्रव्यः। बलःोति जातिद्रव्यबलानि, तेषाम्। मत्प्रभुत्वम्=मम प्रभुत्वम्।

**सन्धि-विच्छेदः**-साम्यमेषाम्=साम्यम्+एषाम्। तद् भविष्यति=तत्+ भविष्यति।

**प्रकृति प्रत्ययः**-प्रभुत्वम्=प्रभु+त्व। कदा=किम्+दा (किमः कादेशः)

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अन्यच्च - **विना वर्तनमेवैते न त्यजन्ति ममान्तिकम्।**
**तन्मे प्राणव्ययेनापि जीवयैतान् ममाश्रितान्॥46॥**

**प्रसङ्गः**-अत्र चित्रग्रीवः स्वबन्धनभेदनापेक्षया पूर्वं कपोतानां पाशमुक्तये मित्राय निवेदयति।

**अन्वयः**-एते वर्तनं विना एव मम अन्तिकं न त्यजन्ति, तत् मे प्राणव्ययेन अपि मम आश्रितान् एतान् जीवय।

**व्याख्या**- अन्यच्च=अपरः।, एते=इमे कपोताः, वर्तनं=वृत्तिम् (जीविकाम्) विना=अतिरिक्तम्, ममान्तिकम्=मम (चित्रग्रीवस्य) साहचर्यम्, न=नहि, त्यजन्ति= मुःान्ति,तत्=तस्मात् कारणात्, मे=मम, प्राणव्ययेनापि=असुपरित्यागेनापि, ममाश्रितान् =मद्भृत्यान् कपोतान्, एतान्=इमान्, जीवय=पूर्वं रक्ष।

**सरलार्थ** :-जीविकां विनापि इमे कपोता मम साहचर्यं नैव त्यजन्ति, एतदर्थं पूर्वं ममाश्रितान् एतान् कपोतान् परिपालय।

**व्याकरणम् -**

**समासः**- प्राणव्ययेनापि=प्राणानां व्ययः प्राणव्ययः तेन।

**सन्धि-विच्छेदः**-वर्तनमेवैते=वर्तनम्+एव+एते।ममान्तिकम् मम+अन्तिकम्। जीवयैतान्=जीवय+एतान्।

**प्रकृति प्रत्ययः**-वर्तनम्=वृत्+ल्युट् (यु=अन)। अन्तिकम्=अन्त+ठन् (ठ=इक)। आश्रितान्=आ+श्रि+क्त (त)+शस् (अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

किञ्च - **मांसमूत्रपुरीषाऽस्थिपूरितेऽत्र कलेवरे।**
**विनश्वरे विहायऽऽस्थां यशः पालय मित्र मे ॥47॥**

**प्रसङ्गः**-अत्र शरीररक्षणापेक्षया कीर्तिरक्षणं श्रेष्ठतरमस्तीति वर्णितम्।

**अन्वयः**-मित्र! मांसमूत्रपुरीषास्थिपूरिते विनश्वरे अत्रकलेवरे आस्थां विहाय, मे यशः पालय।

**व्याख्या**- किञ्च=अपि च, मित्र!=हे सखे !, मांसमूत्रपुरीषास्थिपूरिते= मांसः=पिशितः, मूत्रः=प्रस्रावश्च, पुरीषः=मलः, अस्थि च=सक्थि च तैः पूरितं=परिपूर्णे, तस्मिन्, विनश्वरे=विनाशशीले, अत्र=अस्मिन्, कलेवरे=शरीरे, आस्थाम्=आसक्तिम्, विहाय=परित्यज्य, मे=मम, यशः=कीर्तिम्, रक्ष=परिपालय।

**सरलार्थः**-हे मित्र ! मांसमलमूत्रास्थिपरिपूर्णेऽस्मिन् विनाशशीले शरीरे आसक्तिं विहाय शरणागतस्य मित्रस्य वचनं परिरक्ष्य स्वयशः परिपालय।

**व्याकरणम् -**

**समासः**-मांसमूत्रपुरीषास्थिपूरिते=मांसः मूत्रः पुरीषः अस्थि च तैः पूरितं मांसमूत्रपुरीषास्थिपूरितम्, तस्मिन्।

**सन्धि-विच्छेदः**- किञ्च=किम्+च। मांसमूत्रपुरीषास्थिपूरितेऽत्र=मांस-मूत्रपुरीष+अस्थिपूरिते+अत्र। विहायास्थाम्= विहाय+आस्थाम्।

**प्रकृति प्रत्ययः**-पूरित=पूर्+क्त (त)+ङि(इ)। अत्र=इदम्+त्रल्(त्र) (प्रकृतेः अश् भावश्च)। विहाय=वि+हा+ ल्यप्(य)। आस्थाम्=आ+स्था+अङ् (अ)+अम्।

**छन्द** :-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरञ्च पश्य- **यदि नित्यमनित्येन निर्मलं मलवाहिना।**
**यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम्॥48॥**

**प्रसङ्गः**-शरीररक्षणमत्यावश्यकं, परं तस्यापेक्षया यशो रक्षणं श्रेष्ठतरं मन्यते।

**अन्वयः**-यदि अनित्येन मलवाहिना कायेन नित्यं निर्मलं यशः लभ्येत, तत् किं नु लब्धं न भवेत्।

**व्याख्या**-अपरञ्च=अन्यच्च, पश्य=अवलोकय, यदि=चेत्, अनित्येन= नश्वरेण, मलवाहिना=पुरीषयुक्तेन, कायेन=शरीरेण, नित्यं=विनाशरहितम्, निर्मलं= पवित्रम्, यशः=कीर्तिः, लभ्येत=प्राप्येत, तत्=तर्हि, नु=इति वितर्के, किं=वस्तु, न लब्धं=नैव प्राप्तम्, भवेत्=लभेत (स्यात्)।

**सरलार्थः**-विनाशशीलेन मलमूत्रधारिणाऽनेन शरीरेण यदि नित्यं निर्मलञ्च यशः प्राप्येत तर्हि लोकस्य अखिलं वस्त्वधिगतमिति बोध्यम्।

**व्याकरणम् -**

**समासः**-अपरम्=न परो यस्मात् तत्। मलवाहिना=मलानि वहतीति मलवाही, तेन।

**सन्धि-विच्छेदः**- अपरञ्च=अपरम्+च। तन्न=तत्+न। भवेन्नु=भवेत्+नु।

**प्रकृति प्रत्ययः**-अनित्येन=न+नि+त्यप् (त्य)+टा (इन)। वाहिना= वह्+णिनि (इन्)+टा (आ)। लब्धम्=लभ्+क्त (त)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

यतः- **शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम्।**
**शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः॥49॥**

**प्रसङ्गः**-अत्र कपोतराजश्चित्रग्रीव आत्मनो यशः प्रति चिन्तितो दृश्यते।

**अन्वयः-**शरीरस्य गुणानां च अन्तरम् अत्यन्तं दूरम् (अस्ति), शरीरं क्षणविध्वंसि (भवति) गुणाः कल्पान्तस्थायिनः (भवन्ति)।

**व्याख्या-**यतः=यतोहि, शरीरस्य=देहस्य, गुणानां च=दयादाक्षिण्यादिगुणानां च, अन्तरं=भेदः, अत्यन्तम्= अधिकम्, दूरम्=नान्तिकम्, (अस्ति=वर्तते) शरीरं =वपुः, क्षणविध्वंसि = क्षणभङ्गुरम्, (भवति = जायते) गुणाः = दयादाक्षिण्यादयस्तु, कल्पान्तस्थायिनः=युगान्तस्थायिनो भवन्ति।

**सरलार्थः-**दयादाक्षिण्यादिगुणेषु शरीरे चातीव भेदो वर्तते, यतोहि शरीरं क्षणभङ्गुरं भवति गुणाश्च बहुकालस्थायिनो भवन्ति। अतो यशसो रक्षणमेव श्रेष्ठतरं मन्यते।

**व्याकरणम् -**

**समासः-**क्षणविध्वंसि=क्षणेन विध्वंसते इति। कल्पान्तस्थायिनः=कल्पस्य अन्तः कल्पान्तः, तं यावत् तिष्ठन्तीति।

**सन्धि-विच्छेदः-** गुणानां च = गुणानाम् + च। दूरमत्यन्तमन्तरम् = दूरम् + अत्यन्तम्+अन्तरम्।

**प्रकृति प्रत्ययः-**शरीरस्य=शृ+ईरन्(ईर)+ङस् (स्य) विध्वंसि= वि+ध्वंस्+णिनि (इन्)। स्थायिनः=स्था+ णिनि (इन्)+युक् (य्)+जस् (अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत् - 'साधु मित्र! साधु, अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते।' एवमुक्त्वा तेन सर्वेषां कपोतानां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान् सादरं सम्पूज्य आह-सखे चित्रग्रीव! सर्वथाऽत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मनि अवज्ञा न कर्तव्या।**

**व्याख्या -** इति=इत्थं कपोतराजस्य वचनम्। आकर्ण्य=संश्रुत्य, प्रहृष्टमनाः= प्रसन्नचेताः, पुलकितः= रोमाञ्चितः, सन्=भवन्, अब्रवीत्=उवाच, साधु मित्र!= शोभनं सखे!, साधु=शोभनम्, अनेनाश्रितवात्सल्येन=एतेन अनुचरानुरागेण, त्रैलोक्यस्य= स्वर्गमर्त्यपाताललोकस्यापि, प्रभुत्वं=स्वामित्वम्, त्वयि=भवति (कपोतराजे) युज्यते= युक्तं भवति। एवम्=इत्थम्, उक्त्वा=कथयित्वा, तेन= हिरण्यकेन, सर्वेषां=अखिलानां कपोतानाम्, बन्धनानि= जालनियन्त्रणानि, छिन्नानि= खण्डितानि। ततः=तदनन्तरम्, हिरण्यकः=मूषकराजः, सर्वान्= अखिलान्कपोतान्, सादरम्=सम्मानपूर्वकम्, सम्पूज्य =सुष्ठु पूजयित्वा (अतिथि सत्कारं कृत्वा) आह=अवोचत्, सखे चित्रग्रीव!=मित्र चित्रग्रीव! सर्वथा=सर्वप्रकारेण, अत्र=अस्मिन्, जालबन्धनविधौ= व्याधपाशनियन्त्रणकार्ये, सति=जाते, दोषम्= स्वस्यापमानम्, आशङ्क्य=सम्भाव्य, आत्मनि=स्वस्मिन्, अवज्ञा=तिरस्कृतिः, न कर्तव्या=नैव करणीया।

**व्याकरणम् -**

**समासः-**प्रहृष्टमनाः=प्रहृष्टं मनो यस्य सः। आश्रितवात्सल्येन=आश्रितेषु वात्सल्यः आश्रितवात्सल्यः, तेन। त्रैलोक्यस्य=त्रयाणां लोकानां समाहारः, त्रिलोकी, त्रिलोकी एव त्रैलोक्यम्, तस्य।

**सन्धि-विच्छेदः-**इत्याकर्ण्य=इति+आकर्ण्य। त्रैलोक्यस्यापि=त्रैलोक्यस्य+ अपि। ततो हिरण्यकः=ततः+ हिरण्यकः। दोषमाशङ्क्य=दोषम्+आशङ्क्य।

**प्रकृति प्रत्ययः-**आकर्ण्य=आ+कर्ण+ल्यप् (य)। प्रहृष्टः=प्र+हृष्+ क्त(त)। पुलकितः=पुलक+इतच् (इत)। वात्सल्येन=वत्सल+ष्यञ् (य) (भावार्थेऽयं प्रत्ययः)+टा (इन)। उक्त्वा=वच्+क्त्वा(त्वा)। छिन्नानि=छिद्+ क्त(त)+जस् (शि= इ)। आशङ्क्य=आ+शङ्क्+ल्यप् (य)। कर्तव्या=कृ+तव्यत् (तव्य)+टाप् (आ)।

यतः- **योऽधिकाद् योजनशतात् पश्यतीहामिषं खगः।**
**स एव प्राप्तकालस्तु पाशबन्धं न पश्यति॥50॥**

**प्रसङ्गः-**अत्र कालस्य महत्त्वं प्रतिपादितम्।

**अन्वयः**-इह यः खगः योजनशतात् अधिकात् आमिषं पश्यति, स एव प्राप्तकालः तु पाशबन्धं न पश्यति।

**व्याख्या**- यतः=यतोहि, इह=अस्मिन् जगति, यः खगः=यः पक्षिविशेषः श्येनः, योजनशतात्=शतयोजनात् (क्रोशशतात्) अधिकात्=अधिकदूरतः, आमिषं= भक्षणयोग्यं मांसादिकम्, पश्यति=अवलोकयति, स एव=स खग एव, प्राप्तकालस्तु= समये आगते सति, पाशबन्धनं=जालस्य बन्धनम्, न पश्यति=नैवावलोकयति।

**सरलार्थः**-इह लोके यः श्येनाख्यः खगः शतयोजनादपि अधिकदूरादामिषं पश्यति, स एव खगः समये आगते सति जालबन्धनमपि द्रष्टुं न शक्नोति।

**व्याकरणम् -**

**समासः**-योजनशतम्=योजनानां शतं योजनशतम्, तस्मात्। प्राप्तकालः= प्राप्तःकालः यस्य सः। पाशबन्धम्=पाशस्य बन्धः पाशबन्धः, तम्।

**सन्धि-विच्छेदः**-पश्यतीहामिषम्=पश्यति+इह+आमिषम्, प्राप्तकालस्तु= प्राप्तकालः+तु।

**प्रकृति+प्रत्ययः**-योजनम्=युज्+ल्युट्(यु=अन)। आमिषम्=अम्+टिषच् (इष) दीर्घश्च। प्राप्तः=प्र+आप्+क्त (त)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः‍ा - **शशिदिवाकरयोर्ग्रहपीडनम्,**
**गजभुजंगमयोरपि बन्धनम्।**
**मतिमतां च विलोक्य दरिद्रतां,**
**विधिरहो बलवानिति मे मतिः ॥51॥**

**प्रसङ्गः**-अस्मिन् श्लोके भाग्यमेव बलवद् भवतीति प्रतिपादितम्।

**अन्वयः**-शशिदिवाकरयोः ग्रहपीडनम्, गजभुजङ्गमयोः अपि बन्धनम्, मतिमतां दरिद्रतां च विलोक्य, अहो विधिः बलवान् इति मे मतिः (अस्ति)।

**व्याख्या**- अपरः‍ा=अन्यच्च, शशिदिवाकरयोः=चन्द्रसूर्ययोः ग्रहपीडनम्= राहुणाग्रसनम्, गजभुजङ्गमयोरपि= हस्तीसर्पयोरपि, बन्धनम्=नियन्त्रणम्, मतिमताम्= बुद्धिमताम्, दरिद्रताः‍ा=निर्धनताः‍ा, विलोक्य=दृष्ट्वा, अहो=इत्यव्ययं खेदे, विधिः= भाग्यम्, बलवान्=सर्वशक्तिसम्पन्नः, इति=इत्थम्, मे=मम, मतिः=बुद्धिः (अस्ति= वर्तते)।

**सरलार्थः**-चन्द्रसूर्ययोर्राहुणा ग्रहेण पीडनम्, हस्तीसर्पयोर्नियन्त्रणम्, विदुषाः‍ा दारिद्र्यं दृष्ट्वा भाग्यं नूनमेव बलवद् भवतीति सिध्यति।

**व्याकरणम् -**

**समासः**-शशिदिवाकरयोः=शशिश्च दिवाकरश्च शशिदिवाकरौ, तयोः। ग्रहपीडनम्=ग्रहेण पीडनम् (ग्रसनम्) गजभुजङ्गमयोः=गजश्च भुजङ्गमश्च गजभुजङ्गमौ तयोः। मतिमताम्=मतिः अस्ति एषाम् इति मतिमन्तः, तेषाम्। दरिद्रताम्=दरिद्रस्य भावो दरिद्रता, ताम्।

**सन्धि-विच्छेदः**-अपरः‍ा=अपरम्+च। विधिरहो=विधिः+अहो।

**प्रकृति प्रत्ययः**-पीडनम्=पीड्+ल्युट् (यु=अन)। बन्धनम्=बन्ध्+ल्युट्= (यु+अन) मतिमताम्=मन्+क्तिन् (ति)+मतुप् (मत्) +आम्। विलोक्य=वि+लोक्+ ल्यप् (य)। बलवान्=बल+मतुप् (मत्) मस्य वत्म्।

**छन्दः**-अत्र द्रुतविलम्बितनामधेयं वृतं वर्तते।

अन्यच्च - **व्योमैकान्तविहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदः,**
**वध्यन्ते निपुणैरगाधसलिलान् मत्स्याः समुद्रादपि।**

**दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः।**
**कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥52॥**

**प्रसङ्गः-**अत्र मृत्योः (कालस्य) माहात्म्यं वर्णितम्।

**अन्वयः-**व्योमैकान्तविहारिणः अपि विहगाः आपदं सम्प्राप्नुवन्ति निपुणैः अगाधसलिलात् समुद्रात् अपि मत्स्याः वध्यन्ते। इह दुर्नीतं किम् अस्ति? सुचरितं किम् अस्ति? स्थानलाभे कः गुणः अस्ति, हि व्यसनप्रसारित करः कालः दूरात् अपि गृह्णाति।

**व्याख्या-** अन्यच्च=अपरःा, व्योमैकान्तविहारिणः=व्योमस्य=आकाशस्य एकान्ते = निर्जनप्रदेशे (उपरि भागे) विहारिणः = भ्रमणशीलाः, अपि विहगाः = पक्षिणोऽपि, आपदं-पाशबन्धनरूपां विपत्तिम्, सम्प्राप्नुवन्ति=समधिगच्छन्ति, निपुणैः =कुशलैः धीवरैः, अगाधसलिलात्=अतलस्पर्शाज्जलात्, समुद्रादपि= रत्नाकरादपि, मत्स्याः=मीनाः, बध्यन्ते=ध्रियन्ते। इह=अस्मिन् लोके, दुर्नीतम्=दुश्चरितम्, किमस्ति= किं वर्तते, सुचरितं=शोभनमाचरणम्, किमस्ति=किं वर्तते, स्थानलाभे= सुरक्षितप्रदेशप्राप्तौ, कःगुणः=किं फलम्, अस्ति=वर्तते, हि=यतोहि, व्यसनप्रसारितकरः= विपत्तौप्रसारितहस्तः, कालः=मृत्युः समयो वा, दूरादपि=विप्रकृष्टादपि, गृह्णाति=गृहणं करोति।

**सरलार्थ :-**गगने भ्रमणशीलाः खगाः अपि विपत्तिं सम्प्राप्नुवन्ति, धीवराः सागरादपि मत्स्याः ध्रियन्ते, अस्मिन् जगति न काचिद् दुर्नीतिः वर्तते न च सुनीतिः। श्रेष्ठस्थानलाभेऽपि न किमपि प्रयोजनं सिध्यति। यतोहि विपदिआगतायां सत्यां दूरत एव हस्तौ प्रसार्य गृह्णाति।

**व्याकरणम् -**

**समासः-**व्योमैकान्तविहारिणः=व्योम्नः एकान्तः व्योमैकान्तः, तस्मिन् विहरन्तीति। अगाधसलिलात्= अगाधानि सलिलानि यस्मिन् स अगाधसलिलः, तस्मात्। स्थानलाभे=स्थानस्य लाभः स्थानलाभः तस्मिन्। व्यसनप्रसारितकरः=व्यसने (दुःखसमये) प्रसारितौ हस्तौ येन सः।

**सन्धि-विच्छेदः-**व्योमैकान्तविहारिणोऽपि=व्योम+एकान्तविहारिणः+अपि।सम्प्राप्नुवन्त्यापदम्=सम्+ प्राप्नुवन्ति+ आपदम्। समुद्रादपि=समुद्रात्+अपि। किमिहास्ति=किम्+इह+अस्ति।

**प्रकृति प्रत्ययः-**विहारिणः=वि+हार+इनि=(इन्)+जस् (अस्)। दुर्नीतम् =दुर्+नी+क्त (त)। सुचरितम्=सु+ चर्+क्त (त)। प्रसारितः=प्र+सृ+णिच् (इ)+ क्त(त)। करः=कृ+अप्(अ)।

**छन्दः-**अत्र शार्दूलविक्रीडितं नामवृत्तं वर्तते।

इति प्रबोध्य आतिथ्यं कृत्वा आलिङ्ग्य च तेन सम्प्रेषितश्चित्रग्रीवोऽपि सपरिवारो यथेष्टदेशान् ययौ, हिरण्यकोऽपि स्वविवरं प्रविष्टः।

**व्याख्या-** इति=एवंविधम्, प्रबोध्य=आश्वासनं प्रदाय, आतिथ्यम्= अतिथिसत्कारम्, कृत्वा=विधाय, आलिङ्ग्य च=आलिङ्गनं च कृत्वा, चित्रग्रीवः= कपोतराजः, तेन=हिरण्यकेन, सम्प्रेषितः=विसर्जितः, यथेष्टदेशान्= स्वाभिलषितस्थानानि, सपरिवारः=सबान्धवः, ययौ=प्रस्थितवान्। हिरण्यकोऽपि= मूषकराजोऽपि स्वविवरम्= निजबिलम्, प्रविष्टः=प्रविशति स्म।

**व्याकरणम् -**

**समासः-**आतिथ्यम्=अतति गच्छतीति अतिथिः, अतिथये इदम् आतिथ्यम्। सपरिवारः=परिवारेण सहितः। स्वविवरम्=स्वस्य विवरम्।

**सन्धि-विच्छेदः-**सम्प्रेषितश्चित्रग्रीवोऽपि=सम्प्रेषितः+चित्रग्रीवः+अपि। हिरण्यकोऽपि=हिरण्यकः+अपि।

**प्रकृति प्रत्ययः-**प्रबोध्य=प्र+बुध्+णिच्+ल्यप् (य)। कृत्वा=कृ+क्त्वा (त्वा)। सम्प्रेषितः=सम्+प्र+इष्+ क्त(त)। प्रविष्टः=प्र+विश्+क्त (त)।

**यानि कानि च मित्राणि कर्तव्यानि शतानि च।**
**पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥53॥**

**प्रसङ्गः-**लोके लघुदीर्घयोः शिक्षिताशिक्षितयो र्भेदं विना बहूनि मित्राणि कर्तव्यानि।

**अन्वयः-**(पुरुषेण) यानि कानि च शतानि च मित्राणि कर्तव्यानि, पश्य, कपोताः मूषिकमित्रेण मुक्तबन्धनाः (जाताः)।

**व्याख्या-**पुरुषेण=मनुष्येण, यानि कानि च=यादृशानि तादृशानि दुर्बलानि सबलानि धनानि निर्धनानि वा, शतानि=बहुसंख्याकानि, मित्राणि=सुहृदः, कर्तव्यानि= करणीयानि, पश्य=अवलोकय, कपोताः=पारावताः, मूषिकमित्रेण=आखु (मित्रेण) सुहृदा, मुक्तबन्धनाः=बन्धनरहिताः (जाताः=अभूवन्)।

**सरलार्थः-**इह लोके सर्वैः प्राणिभिः यानि कानि सबलानि दुर्बलानि च बहूनि मित्राणि कार्याणि। यतोहि एकेन सामान्येन हिरण्यकमित्रेण सर्वे कपोताः व्याधपाशात् मुक्ताः सञ्जाताः।

**व्याकरणम् -**

**समासः-**मूषिकमित्रेण=मूषिकः एव मित्रं मूषिकमित्रम्, तेन। मुक्तबन्धनाः= मुक्तं बन्धनं येषां ते।

**सन्धि-विच्छेदः-** कपोता मुक्तबन्धनाः=कपोताः+मुक्तबन्धनाः।

**प्रकृति प्रत्ययः-**कर्तव्यानि=कृ+तव्यत्(तव्य)+जस्=शि((इ)। मुक्तम्= मुच्+क्त (त)। बन्धनाः=बन्ध्+ ल्युट्(यु=अन)+जस्=(अस्)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदामाह- 'अहो हिरण्यक! श्लाघ्योऽसि, अतोऽहमपि त्वया सह मैत्री कर्तुमिच्छामि, अतस्त्वं मां मैत्र्येणानुगृहीतुमर्हसि' एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- 'कस्त्वम्'? स ब्रूते लघूपतनकनामा वायसोऽहम्। हिरण्यको विहस्याह- 'का त्वया सह मैत्री'?

**व्याख्या-** अथ=एतदनन्तरम्, लघुपतनकनामा=लघुपतनाख्यः, काकः= वायसः, सर्ववृत्तान्तदर्शी= अखिलवृत्तान्तदर्शकः, साश्चर्यम्=आश्चर्यपूर्वकम्, इदमाह= एतद् उवाच, अहो=अये!, हिरण्यक!=मूषकराज!, श्लाध्योऽसि= प्रशंसनीयोऽसि, अतः=अस्माद्धेतोः, अहमपि=वायसोऽपि, त्वया सह=हिरण्यकेन सार्द्धम्, मैत्रीम्= सख्यम्, कर्तुं=विधातुम्, इच्छामि=अभिलषामि, अतः=अस्मात् कारणात्, माम्= लघुपतनकम्, मैत्र्येण=सौहार्देन, अनुगृहीतुम्= कृतकृत्यं कर्तुम्, अर्हसि= योग्योऽसि। एतत्=वायसवचनम्, श्रुत्वा=आकर्ण्य, हिरण्यकोऽपि=एतदाख्यो वायसोऽपि विवरा-भ्यन्तराद्=बिलस्य मध्यतः, आह=अवदत्, कस्त्वम्=त्वं कः, सः= वायसः, ब्रूते= वदति, लघुपतनकनामा=एतदाख्यः, वायसोऽहम्=काकोऽहमस्मि। हिरण्यकः= मूषकराजः, विहस्य=हसित्वा, आह=अब्रवीत्, का=कीदृशी, त्वया=भवता (काकेन) सह=साकम्=मैत्री, सौहार्दम् इति।

**व्याकरणम् -**

**समासः-**लघुपतनकनामा=लघुपतनक इति नाम यस्य सः। सर्ववृत्तान्तदर्शी = सर्वं च तद् वृत्तान्तं च सर्ववृत्तान्तम्, तत् पश्यतीति। साश्चर्यम्= आश्चर्येण सहितम्। विवराभ्यन्तरात्=विवरस्याभ्यन्तरं विवराभ्यन्तरम्, तस्मात्।

**सन्धि-विच्छेदः-**साश्चर्यम्=स+ आश्चर्यम्। श्लाघ्योऽसि=श्लाघ्यः+ असि। अतोऽहमपि=अतः+अहम्+ अपि। अतस्त्वम्=अतः+त्वम्। एतच्छ्रुत्वा= एतत् +श्रुत्वा, विवराभ्यन्तरादाह=विवर+अभ्यन्तरात्+आह। कस्त्वम्=कः+ त्वम्। हिरण्यको विहस्याह=हिरण्यकः+विहस्य+आह।

**प्रकृति प्रत्ययः-**दर्शी=दृश्+णिनि (इन्)। गृहीतुम्=गृह्+तुमुन् (तुम्) इटो दीर्घश्च। श्रुत्वा=श्रु+क्त्वा (त्वा)। विहस्य=वि+हस्+ल्यप् (य)।

यतः- **यद् येन युज्यते लोके बुधस्तत् तेन योजयेत्।**
**अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥54॥**

**प्रसङ्गः**-अस्मिन् श्लोके भक्ष्यभक्षकयोर्मैत्री भवितुं नार्हतीति प्रतिपादितम्।

**अन्वयः**-लोके येन यत् युज्यते बुधः तेन तत् योजयेत्, अहम् (भवतः) अन्नम् (अस्मि) भवान् (मम) भोक्ता (अस्ति) (अतः) प्रीतिः कथं भविष्यति।

**व्याख्या**- यतः=यतोहि, लोके=जगति, येन=पुरुषेण सह, यत्=यो नरः, युज्यते=योजयितुं योग्यो भवति, बुधः=विद्वान्, तत्=व्यक्तिविशेषम्, तेन=व्यक्तिविशेषेण सार्धम्, योजयेत्=सम्मेलयेत्, अहम्=हिरण्यकाख्यो मूषकः(भवतः= तव) अन्नम्-भक्ष्यम्, (अस्मि) भवान्=त्वम् (काकः) (मम=मे)(मूषकस्य) भोक्ता= खादिता (भक्षणकर्ता) (अस्ति) (अतः=अस्मात्, कारणात्) प्रीतिः=मैत्री, कथं=केन प्रकारेण, भविष्यति=सम्पत्स्यते।

**सरलार्थः**-लोके यः पुरुषः येन पुरुषेण सह योजयितुं योग्यो भवति, प्राज्ञः पुरुषः तेन योग्येन साकं तं योग्यं नरं योजयति। अतोऽहं मूषकः तव भक्ष्यमस्मि भवाः। मम भक्षको वर्तते। एतदर्थं भवता सह मम मैत्री कथमपि भवितुं न शक्नोति।

**व्याकरणम् -**

**सन्धि-विच्छेदः**-यद् येन=यत्+येन। बुधस्तत्=बुधः+तत्। प्रीतिर्भविष्यति = प्रीतिः+भविष्यति।

**प्रकृति प्रत्ययः**-बुधः=बुध्+क(अ)। भोक्ता=भुज्+तृच्(तृ)। प्रीतिः=प्री +क्तिन् (ति)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

अपरः -

**भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम्।**
**शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥55॥**

**प्रसङ्गः**-अत्र भक्ष्य भक्षकयोर्मैत्री मृगशृगालवद् विपत्तेः कारणं भवतीति वर्णितम्।

**अन्वयः**-भक्ष्यभक्षकयोः प्रीतिः विपत्तेः एव कारणं (भवति) शृगालात् पाशबद्धः असौ मृगः काकेन रक्षितः।

**व्याख्या**-भक्ष्यभक्षकयोः=खाद्यखादकयोः,प्रीतिः=मित्रता, विपत्तेः=आकस्मिक- दुःखस्य, एव=नूनम्, कारणं=हेतुः, (भवति=जायते), शृगालात्= जम्बूकात्, पाशबद्धः =जालनियन्त्रितः, असौ हरिणः=स मृगः काकेन= वायसेन, रक्षितः =पाशान्मुक्तः।

**सरलार्थः**-लोके खाद्यखादकयोर्मैत्री विपदः करिका भवति यथा भक्षकेन शृगालेन संयमितो भक्ष्यो मृगस्तेन वायसेन स्वोपायेन संरक्षितः।

**व्याकरणम्** - भक्ष्यभक्षकयोः=भक्षितुं योग्यः भक्ष्यः, भक्ष्यश्च भक्षकश्च भक्ष्यभक्षकौ, तयोः ।पाशबद्धः=पाशेन बद्धः।

**सन्धि-विच्छेदः**-प्रीतिर्विपत्तेः=प्रीतिः+विपत्तेः। पाशबद्धोऽसौ=पाशबद्धः +असौ।

**प्रकृति प्रत्ययः**-भक्ष्यः=भक्ष्+ण्यत्(य) ।भक्षकः=भक्ष्+ण्वुल्(वु+अक)। विपत्तेः=वि+पत्+क्तिन्(ति)+ ङस्(अस्)। कारणम्=कृ+णिच्(इ)+ल्युट्(यु=अन)। रक्षितः=रक्ष्+क्त (त)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**वायसोऽब्रवीत्- कथमेतत्? हिरण्यकः कथयति-**

**व्याख्या** - वायसः=काकः, अब्रवीत्=उवाच, कथम्=केन प्रकारेण, एतत्= इदं जातम्, हिरण्यकः=मूषकराजः, कथयति-वदति।

**व्याकरणम् -**

**सन्धि-विच्छेदः**-वायसोऽब्रवीत्=वायसः+अब्रवीत्।

**प्रकृति प्रत्ययः**-कथम्=किम्+थमु (थम्) किमः कश्चादेशः।

-

## 'शृगाल-मृग-वायस-कथा'

**अस्ति मगधदेशे चम्पकवतीनाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छयाभ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत्। आः कथमेतन्मांसं सुललितं भक्षयामि? भवतु विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत्- मित्र! कुशलं ते? मृगेणोक्तम् कस्त्वम्? स ब्रूते- क्षुद्रबुद्धिनामा जम्बुकोऽहम्। तत्रारण्ये बन्धुहीनो मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा भवितव्यमिति। मृगेणोक्तम् एवमस्तु।**

**व्याख्या-**

मगधदेशे=एतन्नामके देशे, चम्पकवतीनाम्=चम्पकवती नाम्ना प्रसिद्धम्, अरण्यानी=महावनम्, अस्ति=वर्तते, तस्याम्=तस्मिन् महावने, चिरात्=बहोःकालात् महता=अतिशयेन, स्नेहेन=अनुरागेण, मृगकाकौ=हरिणवायसौ, निवसतः=निवासं कुरुतः। स च=तथा प्रसिद्धः, मृगः=हरिणः, स्वेच्छया=निजाभिलाषया, भ्राम्यन्=भ्रमणं कुर्वन्, हृष्टपुष्टाङ्गः=पुष्टशरीरयुक्तः, केनचित्=केनापि अपरिचितेन, शृगालेन= जम्बूकेन, अवलोकितः=दृष्टः। तम्=मृगम्, दृष्ट्वा=अवलोक्य, शृगालः=जम्बूकः, अचिन्तयत्=अविचारयत्, आः=इति प्रसन्नार्थे, कथम्=केन प्रकारेण, एतन्मांसम् =अस्य मृगस्य आमिषम्, सुललितम्=अतीव मनोहरम्, भक्षयामि=खादिष्यामि, भवतु=अस्तु, विश्वासम्=प्रतीतिम्, तावत्=सर्वादौ, उत्पादयामि=उत्पन्नं करोमि। इति =एतत् आलोच्य=मनसि विचार्य, उपसृत्य=मृगस्य समीपं गत्वा, अब्रवीत्=अवोचत्, मित्र!= सखे!, ते=तव, कुशलं=कल्याणं वर्तते, मृगेण=हरिणेन, उक्तम्=कथितम्, कस्त्वम्= त्वं कोऽसि, सः=शृगालः, ब्रूते=वदति, क्षुद्रबुद्धिनामा=क्षुद्रबुद्धिनामकः, जम्बूकोऽहम् =शृगालोऽस्मि। तत्र=तस्मिन्, अरण्ये=कानने, बन्धुहीनः=स्वजनरहितः, मृतवत्=मृतेन सदृशः, निवसामि=तिष्ठामि, इदानीम्=सम्प्रति, त्वां=भवन्तम्, मित्रमासाद्य=सुहृदो-ऽवाप्य, पुनः=भूयः, सबन्धु=स्वजनेन, (त्वया सह) जीवलोकं=प्राणिजगत्, प्रविष्टो-ऽस्मि=प्रविष्टवान् अस्मि। अधुना=इदानीम्, तव=भवतः, अनुचरेण=सेवकेन, मया= जम्बुकेन, सर्वथा=पूर्णतया, भवितव्यमिति =वर्तितव्यमिति। मृगेण=हरिणेन, उक्तम्= कथितम्, एवम्=इत्थम्, अस्तु=भवतु।

**व्याकरणम् -**

**समासः-**मृगकाकौ=मृगश्च काकश्च तौ मृगकाकौ। हृष्टपुष्टाङ्गः=हृष्टानि पुष्टानि च अङ्गानि यस्य सः। स्वेच्छया=स्वस्य इच्छा, तया। क्षुद्रबुद्धिनामा= क्षुद्राबुद्धिः यस्य स क्षुद्रबुद्धिः, स एव नाम यस्य स इति। जीवलोकम् =जीवानां लोकः जीवलोकः तम्। अनुचरेण=अनु (पश्चात्) चरतीति अनुचरः , तेन।

**सन्धि-विच्छेदः-** चिरान्महता= चिरात् + महता।स्वेच्छया=स्व+इच्छया। केनचिच्छृगालेनावलोकितः= केनचित्+शृगालेन+अवलोकितः। इत्यालोच्य=इति+ आलोच्य। उपसृत्याब्रवीत्=उपसृत्य+अब्रवीत्। कस्त्वम्=कः+ त्वम्। सबन्धुर्जीवलोकम्=सबन्धुः+जीवलोकम्। प्रविष्टोऽस्मि=प्रविष्टः+अस्मि। मृगेणोक्तम्=मृगेण+ उक्तम्।

**प्रकृति प्रत्ययः-**अरण्यानि=अरण्य+आनुक् ङीष् च (आन्-ई)। अव-लोकितः=अव+लोक्+क्त (त)। दृष्ट्वा=दृश्+क्त्वा (त्वा)। विश्वासम्= वि+श्वस् +घञ् (अ)। आलोच्य=आ+लोच्+ल्यप् (य)। उपसृत्य=उप+ सृज्+ल्यप् (य)। आसाद्य=आ+सद्+णिच् (इ)+ल्यप् (य)। भवितव्यम् =भू+तव्यत् (तव्य)।

**ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत् - 'सखे! चित्राङ्ग! कोऽयं द्वितीयः?' मृगो ब्रूते- जम्बूकोऽयमस्मत्सख्यमिच्छन्नागतः। काको ब्रूते- मित्र! अकस्मादागन्तुना सह मैत्री न युक्ता।**

**व्याख्या -** ततः=तदनन्तरम्, पश्चात्=अनु, अस्तङ्गते=अस्ताचलप्रस्थिते, सवितरि=दिवाकरे, भगवति= ऐश्वर्ययुक्ते, मरीचिमालिनि=मयूखसमूहयुक्ते, तौ= मृगजम्बूकौ, मृगस्य=हरिणस्य, वासभूमिम्=निवासस्थानम्, गतौ= गतवन्तौ, तत्र= तस्मिन् निवासस्थाने, चम्पकवृक्षशाखायां=चम्पकाख्यपादपस्यांशे, सुबुद्धिनामा= सुबुद्धिनाम्ना प्रसिद्धः

काकः=वायसः, मृगस्य=हरिणस्य, चिरमित्रम्=दीर्घकालीनं सुहृत्, निवसति=निवासं करोति। तौ=मृगशृगालौ, दृष्ट्वा= अवलोक्य, काकः=वायसः, अवदत्=अब्रवीत्, सखे चित्राङ्ग!=मित्र चित्राङ्ग!, कोऽयं द्वितीयः=कोऽसावपरः, मृगः =हरिणः, ब्रूते=ब्रवीति, जम्बुकोऽयम्=असौ शृगालः, अस्मत्=अस्माकम्, सख्यम्=मैत्रीम्, इच्छन् आगतः= अभिलषन् समायातः। काकः=वायसः ब्रूते=प्राह, मित्र =सखे, अकस्मात्=सहसैव, आगन्तुना=प्राघुणिकेन, सह=साकम्, मैत्री= मित्रता, न युक्ता=नैव समीचीना वर्तते।

**व्याकरणम् -**

**समास :-**मरीचिमालिनि=मरीचीनां (किरणानां) माला अस्ति अस्य इति मरीचिमाली, तस्मिन्। सुबुद्धिनामा=सु शोभना बुद्धिर्यस्य सः सुबुद्धिः, सुबुद्धि नाम यस्य सः। अस्मत्सख्यम्=आवयोः सख्यम्।

**सन्धि-विच्छेदः-**पश्चादस्तङ्गते=पश्चात्+ अस्तङ्गते। काकोऽवदत्= काकः+अवदत्। कोऽयम्=कः+अयम्। जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः= जम्बूकः +अयम्+अस्मत् सख्यम्+इच्छन्+आगतः। तन्न=तत्+न। चोक्तम्=च+ उक्तम्।

**प्रकृति प्रत्ययः-**सवितरि=सू+तृच् (तृ)+ङि (इ)। गतौ=गम्+क्त(त)+ औ। दृष्ट्वा=दृश्+क्त्वा (त्वा)। इच्छन् इष्+श (अ)+शतृ (अत्)। आगतः=आ+ गम्+क्त (त)। आगन्तुना=आ+गम्+तुन् (तु)+टा (ना)। युक्ता= युज्+क्त (त)+टाप् (आ)

तथा चोक्तम् - **अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।**
**मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥56॥**

**प्रसङ्गः-** अपरिचितानां कृते कदापि निवासस्थानं नैव दातव्यम्।

**अन्वयः-**अज्ञातकुलशीलस्य कस्यचित् वासः न देयः। हि मार्जारस्य दोषेण जरद्गवः गृध्रः हतः।

**व्याख्या-** अज्ञातकुलशीलस्य=अपरिचितवंशस्वभावस्य, कस्यचित्= कस्यापि अपरिचितस्य, वासः=निवासाश्रयः,न देयः=नैव दातव्यः। हि=यतः,मार्जारस्य=विडालस्य दोषेण=अपराधेन, जरद्गवः=एतदाख्यः, गृध्रः=खगविशेषः,हतः= विनाशितः (अन्यैः खगैः)।

**व्याकरणम् -**

**समासः-**अज्ञातकुलशीलस्य=कुलं च शीलं च कुलशीले, न ज्ञाते अज्ञाते, अज्ञाते कुलशीले यस्य सः, तस्य। जरद्गवः=जरन्तौ (जीर्णौ) गावौ (दृशौ) यस्य सः।

**सन्धि-विच्छेदः-**वासो देयो न=वासः+देयः+न। हतो गृध्रो जरद्गवः= हतः+गृध्रः+जरद्गवः।

**प्रकृति प्रत्ययः-**अज्ञाते=न+ज्ञा+क्त(त)+ङि(इ)। वासः=वस्+णिच् (इ) +घञ् (अ)। दोषेण=दुष्+घञ् (अ)। हतः=हन्+क्त (त)।

छन्दः-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तावाहतुः-कथमेतत्। काकः कथयति -**

**व्याख्या-** तौ=मृगशृगालौ, आहतुः=कथितवन्तौ, एतत्=इदम्, कथम्= केन प्रकरेण (सञ्जातम्) काकः=वायसः, कथयति=ब्रवीति।

**व्याकरणम् -**

**सन्धि-विच्छेदः-**तावाहतुः=तौ+आहतुः। कथमेतत्=कथम्+एतत्।

**प्रकृति प्रत्ययः-**तौ=तद्+औ। कथम्=किम्+थम् (थ) किमः कादेशश्च।

## अभ्यासार्थ-प्रश्नाः

### बहुचयनात्मकप्रश्नाः -

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. आपत्काले उपस्थिते वचनं ग्राह्यम्-

   (अ) बालकस्य (ब) मित्रस्य (स) वृद्धस्य (द) खलस्य ( )

2. शङ्काभिरन्नं पानं सर्वःा आक्रान्तम् -

   (अ) आकाशे (ब) भूतले (स) नगरे (द) ग्रामे ( )

3. लोभः कारणमस्ति-

   (अ) पापस्य (ब) जीवनस्य (स) धनस्य (द) ज्ञानस्य ( )

4. पुंसां धियोऽपि मलिना भवन्ति-

   (अ) सम्पत्तिकाले (ब) प्रातःकाले (स) सायंकाले (द) विपत्तिकाले ( )

5. लोके स पुण्यवान् अस्ति-

   (अ) यस्य मित्रेण विरोधः (ब) यस्य मित्रेण विवादः

   (स) यस्य मित्रेण संलापः (द) यस्य मित्रेण असम्भाषः ( )

6. धर्मार्थकाममोक्षाणां संस्थितिहेतवः सन्ति-

   (अ) प्राणाः (ब) ज्ञानानि (स) धनानि (द) शरीराणि ( )

### अतिलघूत्तरात्मकप्रश्नाः -

1. सर्वथाऽविचारितं किं न कर्तव्यम् ?
2. वृद्धस्य वचनं कदा ग्राह्यम्?
3. लोभात् कः प्रजायते?
4. मुखरः कदा हन्यते?
5. वत्सस्य बन्धने मातृजङ्घा भवति?
6. विपदि धैर्यं केषां प्रकृतिसिद्धम्?
7. पुरुषेण कति दोषा हातव्याः?
8. गुणत्वमापन्नैः तृणैः के बध्यन्ते?
9. कदा तण्डुला न प्ररोहन्ति?
10. अन्ये कस्मात् हितबुद्धयो भवन्ति ?
11. कपोतानां पाशबन्धनं कस्य फलमासीत् ?
12. आत्मापराधवृक्षाणां कानि फलानि सन्ति ?
13. कैः सततम् आत्मानं रक्षेत्?
14. प्राज्ञः परार्थे किं परित्यजेत्?
15. कीदृशानि कति मित्राणि कर्त्तव्यानि?

### लघूत्तरात्मकप्रश्नाः -

1. कीदृशः सुतः कस्मिन् काले विक्रियां न याति ?
2. के दुःखभागिनो भवन्ति?
3. तण्डुलकणलोभेन कपोताः कुत आगत्योपविष्टाः?

4. आपत्काले समागते किं करणीयम्?
5. लोभात् कृमशः किं किं प्रजायते?
6. गणस्याग्रे कथं न गच्छेत्?
7. पुंसां धियः कदा मलिना भवन्ति?
8. बन्धोर्लक्षणं प्रतिपादयत?
9. कीदृशं विरलं सुतं जननी जनयति?
10. हिरण्यकाख्यो मूषिकराजः कुत्र निवसति?
11. मूषिकराजस्य तत्र कथं निवसति स्म?
12. हिरण्यकस्य समीपे कपोताः कथं गतवन्तः?
13. चित्रग्रीवस्य वचनं श्रुत्वा हिरण्यकः किमुवाच?
14. प्राणाः केषां संस्थितिहेतवः ?
15. शरीरगुणयोरन्तरं प्रतिपादयत।

**निबन्धात्मक प्रश्नाः -**

1. हिरण्यकचित्रग्रीवयोः कथासारः सङ्क्षिप्य लिखत।
2. मृगकाकशृगालानां मैत्री संवादः सङ्क्षेपेण वर्णयत।
3. भाग्यं बलवद् अस्तीति प्रतिपादयत।
4. महापुरुषाणां लक्षणं निरूपयत।

**उत्तरमाला (बहुचनात्मकप्रश्नानाम्)**

(**1**) स (**2**) ब (**3**) अ (**4**) द (**5**) स (**6**) अ

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | ह्युपस्थिते | = | हि+उपस्थिते | = | यण्सन्धिः |
| | षडेते | = | .............. | = | .......... |
| | एतच्छ्रुत्वा= | .............. | = | .......... | |
| | हितोप्यायाति | = | .............. | = | .......... |
| | उड्डीयताम् | = | .............. | = | .......... |
| | पाशांश्छेत्स्यति | = | .............. | = | .......... |
| | संस्थितिः | = | .............. | = | .......... |
| | ईदृश्येव | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | कर्तव्यम् | = | कृ+तव्यत्। |
| | उपविष्टाः | = | .................... |
| | सम्पदि | = | .................... |
| | इच्छता | = | .................... |
| | संस्थितिः | = | .................... |
| | पुण्यवान् | = | .................... |

प्राज्ञः = ....................

मतिमताम् = ....................

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-

1. लोभात् कामः प्रजायते। (लोट्)

2. ते सर्वे कपोताः जालनिबद्धाःबभूवुः। (लङ्)

3. स व्याधः पश्चाद् धावितोऽचिन्तयत्।(लृट्)

4. हिरण्यकश्चित्रवने निवसति। (लिङ्)

5. मूषिकराजः स्वविवरं प्राविशत्। (लट्)

4. **(अ) असमस्तपदानां समासो विधेयः -**

ईर्ष्या विद्यते अस्य इति = ........................

परभाग्येन उपजीवतीति = ........................

प्रकर्षेण जायते इति = ........................

रमन्ते योगिनोऽस्मिन् सः = ........................

मत्ताश्च ते दन्तिनः = ........................

हिता बुद्धिः येषां ते = ........................

**(ब) समस्तपदानां विगृहः कार्यः -**

आपत्काले = ........................

कापुरुषलक्षणम् = ........................

मत्तदन्तिनः = ........................

हितबुद्धयः = ........................

यथाशक्ति = ........................

आपदर्थे = ........................

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

शङ्काभिः = ........................

संशयानाम् = ........................

महात्मनाम् = ........................

विपदि = ........................

दरिद्रताम् = ........................

बलवान् = ........................

6. कोष्ठके स्थितं शब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

1. अहमन्नं भवान् ........... कथं प्रीतिर्भविष्यति।(भोक्तृ)
2. विधिरहो ........... इति मे मतिः।(बलवत्)
3. ........... प्राणाः संस्थिति हेतवः। (धर्मार्थकाममोक्ष)
4. यावच्छक्यं ........... बन्धनं छेत्स्यामि। (एतद्)
5. इदं हि ........... प्रकृतिसिद्धम्। (महात्मन्)